**SAHITYA (Optional)**

**SASTRI/B.A II YEAR**
**Part II - Paper - IV**

# RATNĀVALĪ (Śrīharṣapraṇītā)

## PART - A


*Directorate of Distance Education*

National Sanskrit University
(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)
Accredited at 'A' level by NAAC
Tirupati - 517 507 (A.P.)

**CHIEF EDITOR**

Vice-Chancellor

**GENERAL EDITOR**

Director & Joint Director,  DDE

**PROGRAME CO-ORDINATOR**

Prof.R.Deepta

**ADDITIONAL CO-ORDINATORS**

1. Prof.R.Deepta (Academic)
2. Dr.B.chandrasekharam (Technical)

**SUBJECT CO-ORDINATOR**

Prof.G.S.R.Krishna Murthy

**COURSE WRITER**

Dr.M.K.Suneetha

**DIRECTORATE OF DISTANCE EDUCATION**
**National Sanskrit University,**
**Tirupati.**

# प्रथमांशः

# रूपकसामान्यपरिचयः

## संरचना

1.1 प्रस्तावना
1.2 उद्देश्यानि
1.3 रूपकस्वरूपम्
1.4 रूपकविभागप्रणाली
1.4.1 वस्तु
1.4.2 नेता
1.4.3 रसः
1.5 दशरूपकानि
1.6 उपरूपकानि
1.7 रूपकेषु नाटकम्
1.8 उपरूपकेषु नाटिका
1.9 रत्नावल्याः नामौचित्यम्
1.10 सारांशः

## 1.1 प्रस्तावना

ब्रह्मानन्दतुल्यस्य आननद्स्य प्राप्तये कान्तासम्मितानि काव्यानि आद्रियन्ते । कान्तासम्मितानि एतानि काव्यानि मृदुमधुरसरल्या उपदिशन्ति इति यदा मन्दबुद्धीनां तद्वत् तीक्ष्णबुद्धीनामपि सहृदयानां तत्र प्रवृत्तिः दरीदृश्यते ।

एतानि काव्यानि दृश्यानि,श्रव्यानि इति द्विधा विभजन्ते । श्रव्यकाव्यनि गद्यपद्यचम्पूनामभिः त्रिधा भिद्यन्ते । दृश्यकाव्यानि पुनः भिन्नभिन्ननिमित्तानि आदृत्य प्रधानतः दशधा भिद्यन्ते । एतयोः दृश्यश्रव्यकाव्ययोः श्रव्यकाव्यापेक्षया दृश्यकाव्यानामेव महानादरः दृश्यते । ‘ नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ’ इत्यादि

वाक्यानि दृश्यकाव्यनां वैशिष्ट्यं प्रतिपादयन्ति । नाट्शास्त्रकर्ता मुनिः भरतोऽपि दृश्यकाव्यानां वैशिष्ट्यमेव प्रतिपादयन्ति ।

**वेदपुराणेतिहासानाम् आख्यान परिकल्पना ।**
**विनोदजननं लोके नाट्यमेतद् भविष्यति ।।**

**दुःखार्थानां श्रमार्थानां शोकार्थानां तपस्विनां ।**
**विश्रान्ति जननं लोके नाट्यमेतद् भविष्यति** ।। नाट्य.शा.प्र.अ

वेदवाङ्मयस्य अद्यतन असमर्थानाम् अयोग्यानां वा जनानां वेदवाङ्मये विद्यमानानि महत्वानि अवबोधयितुमपि एतानि दृश्यकाव्यादीनि रचितानि इति उच्यन्ते । चतुर्भ्योऽपि वेदेभ्यः चत्वारि तत्तद् विशेषतत्वानि स्वीकृत्य दृश्यकाव्यानि प्रकल्पितानि इत्येतदपि अन्यद् वैशिष्ट्यम् एतेषां दृश्यकाव्यानाम् । तदेवं कथ्यते –

**जग्राह पाठ्यं ऋग्वेदात् सामभ्यो गीतमेव च ।**
**यजुर्वेदादभिनयं रसान् अधर्वनादपि ।।**

एतादृशानि दृश्यकाव्यानि वेदवाङ्मयस्य परिकल्पनात्मकानि तत्रतत्र निबध्यमान मितिवृत्तमाधारीकृत्य, नयकमाधारीकृत्य रसाधीँश्च अंशानाधारीकृत्य दशरूपकानि, अष्टादश उपरूपकानि इति भिद्यन्ते लाक्षणिकैः । श्रहर्षप्रणीता रत्नावली नाटिका उपरूपकेषु अन्यतमा ।

स्वावलोकनप्रश्नाः

1.ऋग्वेदात् किं जग्राह ?

2. सामवेदात् किं आप्नोति ?

3. अभिनयं कस्मात् प्राप्नोति ?

## 1.2 उद्देश्यानि

पाठ्यांशस्य अस्य अध्ययनेन भवता / भवत्या अधोनिर्दिष्टांशाः अवबुध्यन्ते ।

- छात्राः दृश्यश्रव्ययोः स्वरूपभेदान् लिखन्ति ।
- श्रव्यकाव्यापेक्षया दृश्यकाव्यस्य वैशिष्टयं परिशीलयन्ति ।
- रूपकस्वरूपम् अवगच्छन्ति ।
- रूपकविभागप्रणाली (वस्तु नेता रसः) विषये ज्ञानं प्राप्नुवन्ति ।
- दशरूपकाणां परस्परभेदं लिखन्ति ।
- नाटिकायाः नामकरणविषये उचितानुचितविविक्ततां वक्तुं शक्नुवन्ति ।
- कारिकाः पौनःपुण्येन पठित्वा दाढ्यर्थं कण्ठे कुर्वन्ति ।

## 1.3 रूपकस्वरूपम्

साधारणस्य अभिनेतुः (नाटस्य) रामादीनां रूपधारणेन रामत्वादि भवना भवति प्रेक्षेषु, तावत्पर्यन्तं साधारणः कश्चनव्यक्तिः स्वीकृतवेषम् उररीकृत्य वेषउपाधित्वेन दृश्यते । एवञ्च साधारणः अभिनेता राम आहार्यादिकं धृत्वा रामैव दृश्यते । कृष्णस्यरूपं धृत्वा कृष्णैव, सत्यभामायाः रूपं धृत्वा सत्यभामा इवाऽपि दृश्यते । अत एव **रूपं दृश्यतयोच्यते, रूपकं तत्समारोपात्** इत्युक्तं दशरूपके धनञ्जयेन । एवञ्च वेदपुराणेतिहासादिषु निक्षिप्तानां तत्वानाम् आख्यानपरिकल्पना तत्तदाख्यानानां यानि पात्राणि विद्यन्ते तेषां नटेषु, नटीषु वा रूप आरोपात् च दृश्यकाव्याणि रूपकशब्दव्यपदेश्यानि भवन्ति ।

## 1.4 रूपकविभागप्रणाली

रूपकशब्दव्यपदेश्यानि दृश्यकाव्यानि स्वीकृततेतिवृत्तमाधारी -कृत्य तस्य इतिवृत्तं प्रधानं नायकं/नायिकामाधारीकृत्य, रसादिकञ्चाधारीकृत्य प्रधानतः दशदा विभक्तानि लाक्षणिकैः तदेवोक्तं दशरूपके – **वस्तुनेतारसस्तेषां भेदकः** इति ।

उक्तपूर्वयारीत्या वस्तु,नेतृ,रसेषु विद्यमानभेदानाधारीकृत्य रूपकानि दशधा विभक्तानि ।

## 1.4.1 वस्तु

वस्तु पुनः प्रख्यातम्, उत्पाद्यं, मिश्रमिति त्रिधा विभज्यते । रामायणमहाभारतेतिहासपुराणादिषु प्रसिद्धमितिवृत्तमेव प्रख्यातमित्युच्यते । कविना स्वबुध्या कल्पितमितिवृत्तमेव उत्पाद्यमिति शब्देन व्यपदिश्यते । प्रख्यात,कल्पित उभय सम्मिश्रञ्च मिश्रमिति शब्देन व्यवह्रियते ।

## 1.4.2 नेता

नेता पुनः लाक्षणिकैः उदात्तः, उद्धतः,ललितः,शान्तः इति चतुर्था विभज्यन्ते । एते च धीरोपाधिकाः धीरोदात्तः,धीरोद्धतः,धीरललितः, धीरशान्तः इति व्यपदिश्यन्ते । श्रीरामादयो धीरोदात्ताः नायकः, रावणादयो धीरोद्धताः प्रतिनायकाः, उदयनादयो धीरललिताः, चारुदत्तादयो धीरप्रशान्ताः प्रसिद्धाः नेताः ।

## 1.4.3 रसः

**रसश्च श्रृङ्गार हास्य करुण रौद्रवीरभयानकाः ।**
**बीभत्साद्बुत इत्यष्टौ नाट्ये –**

एवञ्च प्रख्यातोत्पाद्यमिश्ररूपम् इतिवृत्तं, धीरोदात्त, धीरोद्धतः,धीरललितः, धीरशान्तनायकं श्रृङ्गारादि अष्ट/नव रसञ्चाधारीकृत्य रूपकं दशधा विभक्तं तद्यथा –

## 1.5 दशरूपकानि -

**नाटकमथप्रकरणं भाणव्यायोगसमवकार डिमः ।**
**ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ।।** इति

नाटकं,प्रकरणं, भाणः व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः,वीथी, प्रहसनमिति नामभिः दशरूपकाणि प्रथन्ते ।

**स्वावलोकनप्रश्नः**

1. दशरूपकाणां नामाणि लिखन्तु ।

## 1.6 उपरूपकानि

उपर्युक्तानि प्रधानरूपकानि विस्तारदृष्ट्या, लक्षणदृष्ट्या च बृहद्रूपाः भवन्ति । तेषामेव रूपकाणां क्वचित् संक्षेपात् क्वचित् च साङ्कर्यात् तान्येव रूपकाणि उपरूपकनाम्ना व्यपदिश्यन्ते तानि च अष्टादश निर्दिश्यन्ते –

**नाटिका त्रोटकं गोष्टी सट्टकं नाट्यरासकं ।**
**प्रस्थानोल्लाप्य काव्यानि प्रेङ्कणं रासकं तथा ।।**

**संलापकं श्रीगदितं शिल्पकञ्च विलासिका ।**
**दुर्मल्लिका प्रकरणे हल्लीशो बाणिकेति च ।।**

**अष्टादश प्राहुरुपरूपकाणि मनीषिणः ।**
**विनाविशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ।। इति**

## 1.7 रूपकेषु नाटकम्

नाटकमिति पदं सर्वस्यापि रूपकस्य साधारणं नाम इति भ्रमः जायते । तत्र मुख्यं कारणं रूपकेषु नाटकं प्रथमं प्रधानञ्च । नाटकलक्षणानि प्रकरणादि रूपकान्तरेष्वपि अनुवर्तन्ते । प्रकरणादीनां प्रधानरूपकाणां नाटिकादीनाम् उपरूपकाणां वा विशेषलक्षणानि अपहाय विशिष्टानि सर्वाण्यपि नाटकलक्षणान्येव अनुवर्तन्ते । तदेवोक्तम् – **'विना विशेषं सर्वेषां लक्ष्मनाटकमन्वतम्'** इति प्रकरणादीनां रूपकाणां नाटिकादीनाम् उपरूपकाणां विशेषलक्षणज्ञाः पाठकास्तु नाटकस्य इतर रूपकाणाञ्च लक्षणेषु स्वरूपेषु च भेदं सम्यक् विज्ञाय एव व्यवहरन्ति । अन्ये तु नाटकं

इतीदं (Drama) इत्यस्य आङ्ग्लपदस्य समानवाचकत्वेन व्यवहरन्ति ।

**भवन्तः/ भवत्याः विशेषममुं परिगणयन्तु अवधारयन्तु ।**

## 1.8 उपरूपकेषु नाटिका

नाटकस्य सङ्ग्रहरूपमेव नाटिका इति प्रकरणस्य सङ्ग्रहरूपं प्रकरणमिति साधारणतः अवगम्यते । नाटिका, प्रकरिणिका भणिका इत्यत्र विद्यमानाः **'क'** प्रत्ययः अल्पार्थिकः इति मत्वा एतेषां सङ्ग्रहरूपत्वेणसाकं कानिचन विशेषलक्षणान्यपि भवन्ति । उदाहरणार्थं नाटिका – नाटकस्य सङ्ग्रहरूपा । ततश्च नाटकलक्षणेन साकं प्रकरणलक्षणान्यपि कानिचन तत्र दृश्यन्ते । तदेवोक्तम् -

**तत्र वस्तु प्रकरणात् नाटकात् नायकोनृपः ।**
**प्रख्यातो धीरललितः श्रृङ्गारोङ्गी सलक्षणः ।।** इति

एवञ्च उपरूपकेषु अन्यतमा नाटिका । नाटकप्रकरणयोः सङ्कीर्णरूपमिति स्थूलतया वक्तुं शक्यते ।

**नाटिकायाः लक्षणम् –**

**नाटिका क्लुप्तवृत्ता स्यात् स्त्रीप्रायाचतुरङ्किका ।**
**प्रख्यातो धीरललितः तत्र स्यात् नायको नृपः ।।**

**स्यादन्तपुरसम्बद्धात् सङ्गीतव्यापृताथवा ।**
**नव्यानुरागाकान्यत्र नायिका नृपवंशजा ।।**

**सम्प्रवर्तेत नेतस्यां देव्याः त्रासेन शङ्कितः ।**
**देवी भवेत् पुनर्जेष्टा प्रगल्भा नृपवंशजा ।।**

**पदे पदे मानवती तद्वसः सङ्गमोद्वयोः ।**

**वृत्तिस्यात् कैशिकी स्वल्पविमर्शाः सन्धयः पुनः ।।** इति

एवञ्च नाटिकायां कल्पितमितिवृत्तम् । नायकस्तु प्रख्यातः धीरललितः, रसश्च श्रृङ्गारः ।

**स्वावलोकनप्रश्नाः**

1. नाटिकायाम् इतिवृत्तं कीदृशम् ?

2. नाटिकायाम् कति अङ्काः भवन्ति ?

3. कस्मिन् वंशे उत्पन्ना नायिका अत्र भवितुमर्हति ?

## 1.9 रत्नावल्याः नामौचित्यम्

नामकरणं नाटकस्य 'गर्भितार्थप्रकाशकम्' इति शास्त्रोक्तमनुश्रुत्य सर्वस्यापि रूपकस्य नामकरणं गर्भितार्थस्य प्रकाशकं यथा स्यात् तथा कर्तव्यम् । उक्तपूर्वे नाटके नाटकस्य इति पदं सर्वेषां रूपकाणाम् उपलक्षकम् । अतश्च नाटकादि प्रधानरूपकाणां नामानि वा -

**डोम्भी श्रीगदितम् भाणो भाणीप्रस्थानरासकाः ।**
**काव्यञ्च सप्त नृत्यस्य भेदाः स्युस्तेऽपि भाणवत् ।।** इति इत्यादि उपरूपकाणां वा नामानि गर्भितार्थप्रकाशकानि स्युः ।

क्वचित् नायकस्य प्राधान्यं दत्वा नामकरणं भवति । यथा उदात्तराघवम्, महावीरचरितम् इत्यादि । क्वचित् च नायिकायाः नाम्नः आधारेणैव रूपकाणां नामानि भवन्ति । यथा प्रियदर्शिका इत्यादि । क्वचित् रूपकस्य मुख्यां संघटनाम् आधारीकृत्य रूपकनामानि भवन्ति यथा – मृच्छकचिकम्, ऊरुभङ्गः इत्यादि ।

अभिज्ञानशाकुन्तलम् इति नामकरणमपि तस्य रूपकस्य मुख्येन अङ्गुलीयकरूपकेन अभिज्ञानेन ज्ञातायाः शकुन्तलायाः इतिवृत्तं प्रतिफलति । रत्नावली इति नामकरणमपि रूपकस्य अस्य अत्यन्तम् उचितमिति प्रतिभाति ।

रत्नावली इति नायिकायाः सागरिकायाः वास्तविकं नाम । तत् च वसुभूतेः 'आयुष्मति न खलु राजपुत्री रत्नावली त्वं एनाम् अवस्थाम् उपागता' इति वचनेन ज्ञायते । सिंहलदेशात् प्रस्थानकाले या रत्नमाला रत्नावल्यै दत्ता तस्याः आधारेणैव नायिकायाः अस्याः प्राथमिकम् अभिज्ञानं भवति । विदूषकस्य कण्ठे विद्यमानां रत्नमालां दृष्ट्वा वसुभूतिः सैवेऽयं रत्नमाला या देवेन राजपुत्र्यै प्रस्थानकाले दत्ता इति चिन्तयति । रूपकस्यास्य वत्सराजविजयः यौगन्धरायणस्य प्राधान्यं योगदानं च रूपकेऽस्मिन् परिशील्य तन्नाम्ना अपि रूपकस्यास्य व्यवहारः कर्तुं शक्यः । प्रधानायाः देव्याः वासवदत्तायाः अपि नाम रूपकस्य अस्य व्यवहारे योजयितुमपि शक्यः । परन्तु एतान् सर्वान् विकल्पान् अतिरिच्य रत्नावली इति नामकरणमेव उचिततरमिति प्रतिभाति । तद्यथा –

इयमेव रत्नमाला प्रवहणभङ्गमग्नोत्थितायाः सागरिकाः इयं रत्नावली इति प्रत्यभिज्ञानात् वासवदत्तायाः हस्ते यौगन्धरायनेन निक्षेपणम् इत्यादयो नैके अंशाः रत्नमालारूपं प्रत्यभिज्ञानम् आधृत्यैव समभूत् इति हेतोः रूपकस्य अस्य नाम रत्नवली इति नामकरणम् उचिततरम् इति प्रतिभाति ।

## 1.10 सारांशः

रूपकाणि दश भवन्ति । नाटकप्रकरणम् इत्यादीनि । एतेषां रूपकाणां वैविध्ये/भेदे वस्तु नेता रसः इत्यादयो मुख्योंऽशाः भवन्ति । विशेषतः रूपकेषु रसास्वादः सहृदयेभ्यः सुलभतरः भवति । तत्र कारणं वाचिक, सात्विक, आङ्गिक, आहार्यादि अभिनयाः । उपर्युक्तानां अंशानाम् अध्ययनेन रूपकपरिचयः सुष्ठु भवति ।

**स्वावलोकनप्रश्नाः**

1.वस्तु भेदाः कति ते के ?

2. नेता कति प्रकारः ?

3.अस्याम् नाटिकायां धीरोपाधिकनायकेषु कः नायकः ?

# रत्नावली नान्दीश्लोकाः - स्वरूपमुद्देश्यञ्च

# द्वितीयांशः

## संरचना

2.1 प्रस्तावना

2.1.1 कविपरिचयः

2. 1. 2 कृतयः

2. 1. 3 नान्दी - स्वरूपमुद्देश्यञ्च

2.2 उद्देश्यानि

2.3 प्रथमनान्दीश्लोकः

2.3.1 अन्वयक्रमः

2.3.2 प्रतिपदार्थः

2.3.3 भावार्थः

2.3.4 प्रथमनान्दीश्लोके प्रथमाङ्ककथावस्तु समन्वयं कुरुत

2.4 द्वितीयनान्दीश्लोकः

2.4.1 अन्वयक्रमः

2.4.2 प्रतिपदार्थः

2.4.3 भावार्थः

2.4.4 द्वितीयनान्दीश्लोके द्वितीयाङ्ककथावस्तु समन्वयं कुरुत

2.5 तृतीयनान्दीश्लोकः

2.5.1 अन्वयक्रमः

2.5.2 प्रतिपदार्थः

2.5.3 भावार्थः

2.5.4 तृतीयनान्दीश्लोके तृतीयाङ्ककथावस्तु समन्वयं कुरुत

2.6 चतुर्थनान्दीश्लोकः

2.6.1 अन्वयक्रमः

2.6.2 प्रतिपदार्थः

2.6.3 भावार्थः

2.6.4 चतुर्थनान्दीश्लोके चतुर्थाङ्ककथावस्तु समन्वयं कुरुत

2.7 सारांशः

2.8 स्वावलोकनप्रश्नाः

2.9 सन्दर्भग्रन्थाः

## 2.1 प्रस्तावना -

अयि भोः प्रियच्छात्राः । रत्नावलीनाटिकायाः अध्ययनप्रारम्भस्य शुभाशयाः । शास्त्रीद्वितीयवर्षस्य पाठ्यक्रमे (Programme) द्वितीयप्रपत्रे श्रीहर्षविरचिता **रत्नावली** नाटिका पाठ्यांशत्वेन प्रकल्पिता । नाटिका इयं चतुरङ्किका ।

भवन्तः जानन्ति यत् – काव्यं दृश्यश्रव्यभेदेन विभक्तमिति । द्रष्टुं योग्यत्वात् काव्यस्वरूपमिदं दृश्यमिति व्यवह्रियते च । ब्रह्मानन्दतुल्यस्य आनन्दप्राप्तये कान्तासम्मितानि काव्यानि आद्रियन्ते। कान्तासम्मितानि एतानि काव्यानि मृदुमधुरसरल्या उपदिशन्ति इति यदा मन्दबुद्धीनां तद्वत् तीक्ष्णबुद्धीनामपि सहृदयानां तत्र प्रवृत्तिः दरीदृश्यते ।

## 2.1.1 कविपरिचयः

चतुरङ्किकायाः अस्याः नाटिकायाः सर्जकः महाकविः श्रीहर्षः, यश्च सप्तमशतकस्य प्रथमपादे कुरुक्षेत्रस्य समीपे **स्थाणेश्वरस्य** देशस्य परिपालकः आसीत् । इतिहासग्रन्थात् स्पष्टीभवति यत् – पिता प्रभाकरवर्द्धनः,माता यशोमती । अग्रजः राज्यवर्धनः अनुजा च राज्यश्रीः ।

## 2. 1. 2 कृतयः

समालोचकानां मतानुसारेण श्रीहर्षस्य तिस्रः कृतयः आसन् । यथा-

1. रत्नावली, 2. प्रियदर्शिका, 3. नागानन्दः इति ।

**स्वावलोकनप्रश्नौ**

1. **श्रीहर्षस्य कालः कः ?**

2. **श्रीहर्षेण कति कृतयः लिखिताः ?**

## 2. 1. 3 नान्दी - स्वरूपमुद्देश्यञ्च

श्रव्यकाव्यापेक्षया दृश्यकाव्यस्य सहृदयमनसाम् आवर्जनं (आकर्षणं) भवति । अत एव **नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्** (का.सू.वृ) इत्यादीनि वाक्यानि दृश्यकाव्यानां वैशिष्ट्यं बोधयति । नाट्शास्त्रकर्ता मुनिः भरतोऽपि दृश्यकाव्यानां वैशिष्ट्यमेवं प्रतिपादयन्ति ।

**वेदपुराणेतिहासानाम् आख्यानपरिकल्पना ।**
**विनोदजननं लोके नाट्यमेतद् भविष्यति ।।**

**दुःखार्थानां श्रमार्थानां शोकार्थानां तपस्विनां ।**
**विश्रान्तिजननं लोके नाट्यमेतद् भविष्यति ।। नाट्य.शा.प्र.अ**

वेदवाङ्मयस्य अद्यतनानाम् असमर्थानाम् अयोग्यानां वा जनानां वेदवाङ्मये विद्यमानानि महत्त्वानि बोधयितुमपि एतानि दृश्यकाव्यादीनि रचितानि इति उच्यन्ते । चतुर्भ्योऽपि वेदेभ्यः चत्वारि तत्तद् विशेषतत्त्वानि स्वीकृत्य दृश्यकाव्यानि प्रकल्पितानि इत्येतदपि अन्यद् वैशिष्ट्यम् एतेषां दृश्यकाव्यानाम् ।

कवयः प्रारीप्सितस्य (प्रारब्धुम् ईप्सितस्य) लोकोत्तरवर्णनानिपुणः कविकर्मणः काव्यस्य निर्विघ्नपरिसमाप्त्यर्थं स्वेष्टदेवताप्रार्थनां परिपालयन्ति । प्रार्थनायाः अस्याः निर्विघ्नपरिसमाप्त्यासाकं काव्यार्थसूचनारूपं, काव्यवस्तु सूचनारूपं, काव्यनायकादिसूचनारूपं विशिष्टं प्रयोजनं भवति । एतच्च मङ्गलाचरणं नमस्कार, वस्तुनिर्देश, आशीर्वचनरूपं वा भवतीति शास्त्रनिर्देशः ।

**[अतः परं प्रवक्ष्यमि ह्युत्थापनविधिक्रियाम् ।]**

**यस्मादुत्थापयन्त्यत्र प्रयोगं नान्दिपाठकाः ।**

**पूर्वमेव तु रङ्गेऽस्मिंस्तस्मादुत्थापनं स्मृतम् ॥ २२॥**

यस्माच्च लोकपालानां परिवृत्य चतुर्दिशम् ।

वन्दनानि प्रकुर्वन्ति तस्माच्च परिवर्तनम् ॥ २३॥

आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते ।

देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥ २४॥

नाट्यशास्त्रम्

आशीर्नमस्क्रियावस्तुनिर्देशान्यतमाश्रया ।
चन्द्रनामाङ्किता प्रायो मङ्गलार्थपदोज्ज्वला ॥

अष्टभिर्दशभिः श्रेष्ठा तथा द्वादशभिः पदैः ।
अष्टादशपदैर्वापि द्वाविंशत्या पदैर्युता ॥

काव्यार्थसूचनोपेता सा या नान्दी प्रकीर्तिता । काव्यमाला

तत्र का नाम नान्दीति कथं च तादृशं नामेत्याकाङ्क्षायां लक्षणमाह –साहित्यदर्पणकर्ता विश्वनाथः -

**आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते ।**

**देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।। 1 ।।**

**शङ्खमाङ्गल्यचन्द्राब्जकोककैरवशंसिनी ।**
**पदैर्युक्ता द्वादशभिरष्टाभिः पदैरुत ।। 2 ।। साहित्यदर्पणः**

देवद्विजनृपादीनाम् आदिपदात् गुर्वादीनां च आशीराशंसा तत्प्रतिपादकेन वचनेन आत्मनः परस्य वा तादृशाशीर्वचनेन संयुक्ता स्तुतिः गुणकीर्तनं यस्मात्प्रवर्तते सत्सु नटैः श्राव्यते । अतस्तद्वचनमेव तत्सम्बन्धान्नान्दीति संज्ञिता । स्तुतिः इत्यत्र 'नित्यम्' इति पाठे स्तुतिरित्यवधार्यम् । तथा च नाटकादिषु सा नित्यमवश्यं प्रयुज्यते, न त्वस्या कादाचित्कत्वस्थितिः । नन्दयति स्तुत्या देवादीनानन्दयतीति नान्दी । सा च नान्दी मङ्गल्यं मङ्गलद्योतकम्, शङ्खम्, चन्द्रम्, अब्जं कमलम्, कोकं चक्रवाकम्, कैरवम् कुमुदम्, वा शंसति

कयाचिदप्यश्विाद्या वृत्या प्रत्यायतीति सा तादृशीश्चेत् । तथा सा द्वादशभिः पदैः सुबन्ततिङन्ताद्यन्यतमैः उत वा अष्टभिः पदैर्युक्ता श्चेत् नान्दीति ।

रत्नावलीनाटिकायां चत्वारः नान्दीश्लोकाः शिवपार्वत्योः परस्परानुरागस्य सङ्केतरूपाः वर्तन्ते । ते सर्वेऽपि आशीर्वचनरूपाः अपि नायिकानायकयोः स्वभावनिरूपणेन साकं इतिवृत्तमपि संस्पृशन्ति । तत्र प्रथमे श्लोके अनुरक्तायाः नूतनायाः नायिकायाः स्वभावचित्रणम् अपि च प्रथमाङ्कस्य वस्तुसूचनं दृश्यते ।

नान्दी, स्त्री, (नन्दन्त्यनयेति । नन्द + घञ् । निपातनात् दीर्घः। ततो ङीप् ।) नाटकाद्यादौ मङ्गलार्था देवद्विजादीनामाशीः । यथा, -- "आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रवर्त्तते । देवद्विजनृपादीनां तस्मान्नान्दीति सा स्मृता | केचित्तु । भेरीप्राया नान्दी ।" इत्यमरटीकायां भरतः ॥ * || नाटके विघ्नविघातायादौ नान्दी कार्या । यदाह भरतः । "यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके । तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नप्रशान्तये ॥ देवद्विजनृपादीनाम् आशीर्वादपरायणा । नन्दन्ति देवता यस्मात्तस्मान्नान्दी प्रकीर्त्तिता ॥" अन्यच्च । "देवद्विजनृपादीनामाशीर्व्वन्दनपूर्बिका । नान्दी कार्या बुधैर्यत्नान्नमस्कारेण संयुता || गङ्गा नागपतिः सोमः सुधा नन्दा जयाशिषः । एभिर्नामपदैः कार्य्या नान्दी धाराभिरङ्किता ॥ प्रशस्तपदविन्यासा चन्द्रसंकीर्त्तनान्विता । आशीर्वादपरा नान्दी योज्येयं मङ्गलात्मिका || काचिद्दशपदा नान्दी काचिदष्टपदा तथा । सूत्रधारः पठेन्नान्दी मध्यमस्वरमाश्रितः ॥" इति मालतीमाधवटीका | समृद्धिः । यथा । "नान्दी समृद्धिरिति कथ्यते ।" इत्युद्वाहतत्त्वे ब्रह्मपुराणम् ॥

**स्वावलोकनप्रश्नाः**

1. नान्दी नाम का ?

2. देवद्विजनृपादीनाम् इत्यत्र अर्थः कः ?

3. मङ्गलाचरणं कति प्रकाराः भवन्ति ?

## 2.2 उद्देश्यानि- एतस्याध्यनानन्तरं छात्रः अधोनिर्दिष्टचेष्टान् कर्तुं शक्नोति -

- छात्रः प्रत्येकमपि श्लोकस्य पदविभागं करोति ।
- छात्रः प्रत्येकमपि श्लोकस्य अन्वयक्रमं वदति ।
- छात्रः प्रत्येकमपि श्लोकं कण्ठे कृत्वा,स्मृत्वा पुनः पुनः लिखति।
- नान्दीश्लोकानाम् अध्ययनेन स्थूलतया कथां अवगच्छन्ति, अनुवदन्ति ।

## 2.3 प्रथमश्लोकः -

**पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रतां**
**शम्भोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने ।**
**ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कम्पया**
**विश्लिष्यन्कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः।।1।।**

**अस्य श्लोकस्य पदच्छेदं कुर्वन्तु -**

## 2.3.1 अन्वयक्रमः-

तदाराधने,पादाग्रस्थितया,स्तनभरेण, मुहुः नम्रताम्, आनीतया, शम्भोः, सस्पृहलोचनम्, यान्त्या, सपुलकस्वेदोद्गमकम्पया, ह्रीमत्या, गिरिजया, शिरसि, ईहितः, क्षिप्तः अन्तरे विश्लिष्यन्, कुसुमाञ्जलिः वः पातु।

## 2.3.2 प्रतिपदार्थः –

**तदाराधने** = तस्य शम्भोः, सेवायाम् , **पादाग्रस्थितया** = चरणयोः अग्रभागभ्याम् स्थितया , **स्तनभरेण** = स्तनयोः भरः स्तनभरः तेन स्तनभारेण, **मुहुः** = वारं वारम्, **नम्रतां** = अवनितम् **,** **आनीतया** = प्रापितया, **शम्भोः** = कल्याणं भावयतीति शम्भुः तस्य शिवस्य**, सस्पृहलोचनत्रयपथं** = स्पृहया अनुरागेनण सहितं सस्पृहं, लोचननाम् त्रयं = नयनानां त्रयं, **सस्पृहलोचनत्रयं** = सानुरागनयनत्रयं, तस्य पन्थाः = तस्य पन्थानम्, **यान्त्या** = गच्छन्त्या, **सपुलकस्वेदोद्गमोत्कम्पया** = पुलकाः रोमाञ्चाः स्वेदोद्गमः धर्माविर्भावः, **उत्कम्पया** = वेपथ्वा, **ह्रीमत्या** = लज्जया गिरिजया, **शिरसि** = मस्तके, **ईहितः** = स्थापितः, **अन्तरे** = शिवपार्वत्योः मध्यदेशे, **विश्लिष्यन्** = श्लथीं, **कुसुमाञ्जलिः** = पुष्पराशिः, **क्षिप्तो** = प्रकीर्णः**, र्गिरिजया** =पार्वत्या, **वः** = युष्मान् , **पातु** = रक्षतु ।

## 2.3.3 भावार्थः -

अत्र शम्भोः गिरिजायाश्च प्रारम्भिक प्रणयः समुपवर्णितः । एतेन उदयनस्य रत्नावल्योः सस्पृह अन्योन्यानुरागरूपं वस्तु अभिव्यज्यते यथा प्रथमाङ्कोपवर्णितम् । अतः **मदनमहोत्सवः** इति अङ्कस्य नामकरणम् ।

2.3.4 प्रथमनान्दीश्लोके प्रथमाङ्ककथाच्छायां लिखत ।

## 2.4 द्वितीयश्लोकः -

**औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया**
**तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः।**
**दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे**
**संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः।। 2 ।।**

### 2.4.1.अन्वयक्रमः -

नवे सङ्गमे, औत्सुक्येन कृतत्वरा सहभुवा, ह्रिया व्यावर्तमाना, तैस्तैः बन्धुवधूजनस्य वचनैः पुनः आभिमुख्यं नीता अग्रे वरं दृष्ट्वा संरोहत्पुलका हसता हरेण श्लिष्टा गौरी वः शिवायास्तु ।

### 2.4.2 प्रतिपदार्थः -

**नवे संगमे** = प्राथमिके सङ्गमे, **औत्सुक्येन** = प्रियसाहचर्यलाभोत्कण्ठया, **कृता** = आश्रिता, **त्वरा** = सहसा, **सहभुवा** = सहोत्पन्नया, **ह्रिया** = लज्जया, **व्यावर्तमाना** = परावर्तनप्रवृत्ता, **तैस्तैः** = तत्कालोपयुक्तैः, **बन्धुवधूजनस्य वचनैः** = भ्रातृजायादेः सख्यादेर्वा वचनैः, **पुनः** = पुनः, **आभिमुख्यं** = प्रियसाम्मुख्यं, **नीता** = प्रापिता, **अग्रे** = पुरतः, **वरं** = श्रेष्ठम्, **दृष्ट्वा** = वीक्ष्य, **संरोहत्पुलकाहसता**= प्रियकरस्पर्शसञ्जातसात्विकभावोद-योद्गतरोमाञ्चा, **हरेण श्लिष्टा** = शिवेन आलिङ्गिता, गौरी = पार्वती, **वः** = युष्माकं सामाजिकानां, **शिवाय** = कल्याणाय, **अस्तु** = भवतु ।

## 2.4.3 भावार्थः --

अयमपि श्लोकः आशीर्वचनरूपः द्वितीयाङ्कवस्तु सूचनात्मकः प्रथमाङ्कान्ते । '**किमयं स राजा उदयनः यस्याहं तातेन दत्ता** ' इति विचिन्तयन्ती, गाढानुरक्ता वियोगविनोदार्थं चित्रफलके राज्ञः चित्रं विलिख्य तस्य सङ्गमोपायं परिचिन्तयन्ती **औत्सुक्येन कृतत्वरा** स्वसख्या सुसङ्गतया ज्ञातवृत्तान्ता लज्जिता चित्रफलकमाच्छादयि-तुमिच्छति । तदेव **- सहभुवा व्यावर्तमाना ह्रिया** तदनु सुसङ्गतयाः प्रोत्साहनेन राज्ञः साम्मुख्यं गन्तुमीहते । तदेव **- तैस्तैर्बन्धुवंधूजनस्य वचनैर्नीताभिमुख्यं पुनः इति** तदनु राज्ञः सङ्गमेन सन्तुष्टा **- दृष्ट्वाग्रे वरमात्तसाध्वसरसा** । एवं रूपेण द्वितीयाङ्के नायिकानायकयोः व्यवहारविशेषाः अत्र संस्पृष्टाः । अङ्कस्यास्य कदलीगृहं नाम ।

2.4.4 द्वितीयनान्दीश्लोके द्वितीयाङ्ककथायाः समन्वयं कुरुत ।

## 2.5 तृतीयश्लोकः

**क्रोधेद्धैर्दृष्टिपातैस्त्रिभिरुपशमिता वह्नयोऽमी त्रयोऽपि**
**त्रासार्ता ऋत्विजोऽधश्चपलगणहृतोष्णीषपट्टाः पतन्ति ।**
**दक्षः स्तौत्यस्य पत्नी विलपति करुणं विद्रुतं चापि देवैः**
**शंसन्नित्यात्तहासो मखमथनविधौ पातु देव्यै शिवो वः।। 3 ।।**

## 2.5.1 अन्वयक्रमः-

त्रयः अपि अमी वह्नयः क्रोधेद्धैः दृष्टिपातैः त्रिभिः उपशमिताः चपलगणहृतोष्णीषपट्टाः त्रासार्ताः ऋत्विजः अधः च पतन्ति दक्षः स्तौति अस्य पत्नी करुणं विलपति अपि च देवैः विद्रुतं इति देव्यै मखमथनविधौ शंसन् आत्तहासः शिवः पातु वः ।

## 2.5.2 प्रतिपदार्थः -

**त्रयः अपि अमी** = प्रसिद्धाः, **वह्नयः** = अग्नयः, **क्रोधेद्धैः** = कोपेन अवमाननाजनितमन्युना प्रदीप्तैः , **दृष्टिपातैः** = नयनत्रितयनिपातनैः, **त्रिभिः** =त्रिसंख्याकैः, **उपशमिताः** = निर्वापिताः, **चपलगणहृतोष्णीषपट्टाः** = चञ्चलैः प्रमथादिगणैः अपनीताः शिरोवेष्टनवस्त्राणि येषां ते तथोक्ताः, **त्रासार्ताः** = त्रासेण वीरभद्रकरालरूपावलोकनजनितभीत्या विह्वलाः, **ऋत्विजः** = याजकाः, **अधः पतन्ति** = भूमौ पतन्ति, **दक्षः** = अध्वरदीक्षितः यजमानः प्रजापतिः **स्तौति** = स्तुतिं करोति, **अस्य** = प्रजापतेः, **पत्नी करुणं विलपति** = स्त्री करुणं परिदेवयति, **अपि च देवैः** = अपि च सुरैः, **विद्रुतं** = पलायितम्, **इति देव्यै** = इति पार्वत्यै, **मखमथनविधौ** = क्रतुविनाशकर्मणि, **शंसन् आत्तहासः** = गृहीतहसनव्यापारः (अट्टहासं कुर्वन्) **शिवः** = शङ्करः **, वः =** युष्मान् **पातु** = रक्षतु ।

## 2.5.3 भावार्थः -

श्लोकेस्मिन् राज्ञः उदयनस्य देव्याः वासवदत्तायाः क्रोधः, उदयनसागरिकयोः समागमजनितः ईर्ष्याकषायितः मनाक्स्पृष्टः । अयं च वृत्तान्तः तृतीयाङ्कपरिशीलनेन अवबुध्यते । तृतीयाङ्के सागरिका सुसङ्गते वासवदत्ताकाञ्चनमालायाः वेषं धृत्वा राजानं मिलिष्यतः इति वार्तां श्रुत्वा वासवदत्ता सङ्केतस्थले आयाति । वासवदत्तावेषं धृत्वा सागरिका समागता इति चिन्तयित्वा वासवदत्तां सागरिका इति मत्वा स्वविरहं प्रकाशयति । तेन क्रुद्धा वासवदत्ता ईर्ष्याकषायिता स्वमन्दिरं गच्छति । तदनन्तरं सागरिका वासवदत्तावेषं धृत्वा राजानं प्राप्नोति । अत्रान्तरे पश्चात्तप्तहृदया वासवदत्ता पुनरागत्य सागरिकया साकं समाश्लिष्टं नायकम् उदयनं दृष्ट्वा पुनः खिन्ना, सागरिकां हठात् बन्धयित्वा रहसि स्थाने निक्षिप्य **सागरिका उज्जयिनीं प्रेषिता** इति वार्तां प्रसारयामास ।

एवञ्च अत्र वासवदत्तायाः क्रोधः तज्जनितकार्यकलापः सम्भावयितुं शक्यते। अस्य अङ्कस्य नाम सङ्केतो इति ।

| 2.5.4 तृतीयनान्दीश्लोके तृतीयाङ्ककथायाः समन्वयं कुरुत । |
|---|
| |

**2.6 चतुर्थश्लोकः -**

**जितमुडुपतिना नमः सुरेभ्यो द्विजवृषभा निरुपद्रवा भवन्तु ।**
**भवतु च पृथिवी समृद्धसस्या प्रतपतु चन्द्रवपुर्नरेन्द्रचन्द्रः ।।4।।**

**2.6.1.अन्वयक्रमः-**

उडुपतिना जितम्, सुरेभ्यः नमः, द्विजवृषभाः निरुपद्रवाः भवन्तु, पृथिवी समृद्धसस्या भवतु, चन्द्रवपुर्नरेन्द्रचन्द्रः प्रतपतु ।

2.6.2.**प्रतिपदार्थः**

**उडुपतिना =** नक्षत्राणां पतिः स्वामी चन्द्रः तेन चन्द्रेण, **जितम् =** सर्वौत्कर्षेण वर्तितम्, **सुरेभ्यः=** देवेभ्यः, **नमः= नमस्कारः, द्विजवृषभाः =** ब्राह्मणश्रेष्ठाः, **निरुपद्रवाः =** विगतबाधाः, **भवन्तु =** जायन्ताम्, **पृथिवी =** पृथिवी, **समृद्धसस्या =** सस्यश्यामला , पृथिवी च समृद्धम् विपुलं सस्यं व्रीह्यादि यस्यां तादृशी सम्पन्नविपुलव्रीहिः **भवतु =** आस्तां, **चन्द्रवपुर्नरेन्द्रचन्द्रः =** चन्द्रवदाह्लादशरीरस्सन् (नरेन्द्रः राजा चन्द्र इवेति नरेन्द्रचन्द्रः चन्द्रवपुः), **प्रतपतु =** प्रकाशयतु।

## 2.6.3 भावार्थः –

अयं श्लोकः वस्तुतः भरतवाक्यमिव प्रतिभाति । सर्वत्रापि रूपकेषु नायकः अन्ते भरतवाक्यं भणति । अत्रापि रत्नावलीनाटिकायां नायकः उदयनः प्रायशः एतदेव आम्रेडयन्निव भरतवाक्यं बभाण ( अवोचत् ) ।

अस्मिन्नपि श्लोके चतुर्थाङ्कस्य संक्षेपः परामृष्टुं शक्या । तद्यथा - **जितमुडुपतिना नमः इत्यनेन** कोशलदेशजयाय यौगन्धरायणेन प्रेषितः रुमण्वान् चतुर्थाङ्कस्य प्रारम्भे कोशलदेशस्य जयसूचिकां वार्तामानयति । तज्जयाय उपकृतवद्भ्यः देवेभ्यः नमस्काररूपकृतज्ञता अत्र व्यज्यते ।

**द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।**
**आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः।। I.6**

इति प्रस्तावनायां सूत्रधारस्य विष्कम्भके यौगन्धरायणस्य च एतदभिभाषणं दैवानुकूल्यस्य उदाहरणम् । नायिकायाः रत्नावल्याः अभिज्ञानं ततो वासवदत्तया राज्ञे तस्याः समर्पणमित्यादि सर्वं दैवानुग्रहस्य सूचकम् । तदेव – **नमस्सुरेभ्यः** इति वाक्येन कृतज्ञतापूर्वकं संसूचनम् । **द्विजवृषभा निरुपद्रवा** इत्यत्र द्विजवृषभाः नाम ब्राह्मणक्षत्रियवैश्यश्रेष्ठाः स्वस्ववृत्तिषु लब्धनिपुणाः राज्यस्य आर्थिकपरिपुष्ट्यै सहयोगं करिष्यन्तीति सूचना । तेन च पृथिवी समृद्धसस्या भवति । एतेषां सर्वेषामपि सहयोगेन सहकारेण चन्द्रवपुः नरेन्द्रचन्द्रः पुनःपुनः प्रतपतु इति कथनेन राज्ञः उदयनस्य चक्रवर्तित्वलाभः यश्च यौगन्धरायणेन सुसङ्कल्पितः संसिद्धः । इत्येवं चतुर्थे नान्दीश्लोके चतुर्थाङ्कस्य संक्षिप्तं रूपं परीक्षितुं शक्यते ।

नान्दीश्लोकोऽयं उक्तपूर्वया रीत्या रूपकस्यास्य भरतवाक्यसमं सन्दृश्यते ।

**उर्वीमुद्दामसस्यां जनयतु विसृजन्वासवो वृष्टिमिष्टा-**
**मिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः।**
**आकल्पान्तं च भूयात्समुपचितसुखः संगमः सज्जनानां**
**निःशेषं यान्तु शान्तिं पिशुनजनगिरो दुर्जया वज्रलेपाः।। IV.22**

इत्येवं रूपेण श्रीहर्षस्य रत्नावलीनामकदृश्यकाव्यस्य कर्तुः नान्दीश्लोकनिर्माणवैशारद्यं सहृदयानां सर्वेषामपि आह्लाददायकं भवतीति निश्चप्रचं वक्तुं शक्यते।

2.6.4 चतुर्थनान्दीश्लोके चतुर्थाङ्ककथाच्छायां लिखत।

## 2.7 सारांशः

नान्द्यां मनाक् काव्यार्थसूचनमपि कर्तव्यमित्युक्तः अतस्तत्प्रदर्श्यते । अत्र प्रथमश्लोके गिरिजाशब्देन सागरिका, पुष्पाञ्जलिक्षेपेण तत्कृतं कामदेवपूजनम्, लोचनत्रयपथं यान्त्येत्यनेन राज्ञो दृष्टिपथाद्रक्षितायाः सागरिकायाः वासवदत्तया राजाध्युषिते मकरन्दोद्याने विलोकनम्, तेन च अहो प्रमादः परिजनस्य इत्यारभ्य **काञ्चनमालाया हस्ते समर्पय** इत्यन्तः सन्दर्भः इत्याद्यर्थाः सूचिताः।

द्वितीये श्लोके **औत्सुक्येन कृतत्वरा** इत्यनेन **हृदय प्रसीद प्रसीद** इत्यारभ्य भर्त्तः अतिकोपना खल्वेषा, तद्दस्ते गृहीत्वा प्रसादयैनाम्। इत्यन्तः काव्यार्थः सूचितः । **दृष्ट्वाग्रे वरमात्तसाध्वसरसा** इत्यनेन **सागरिका – (राजानं दृष्ट्वा सहर्षं ससाध्वसम् ) एनं प्रेक्ष्य अतिसाध्वसेन न शक्नोमि पदात्पदमपि गन्तुं तत्किंवाऽत्र करिष्ये** इति काव्यार्थः सूचितः । **हरेणेति** राजा, **गौरीति** गौरवर्णा सागरिका । श्लिष्टेत्यनेन वासवदत्तानुरोधेन राजकृतं सागरिकापाणिग्रहणम् इत्यादि सूचितम्।

तृतीये श्लोके क्रोधोद्धैरित्यनेन वासवदत्ता क्रोधः, दक्षः स्तौतीत्यनेन राज्ञा कृतं वासवदत्तासान्त्वनं, अस्य पत्नी करुणं विलपतीत्यनेन सागरिका कृतं **हा तात ! एषाहमनायाऽशरणा विपद्ये** इति सागरिका विलपनम्, उपशमिता वह्नय इति त्रासार्ता इति च ऐन्द्रजालिकप्रदर्शिताग्निकृतः संरम्भः तत्प्रशमनं च इत्याद्यर्थजातं सूचितम् ।

चतुर्थमपि पद्यं नान्द्यन्तर्गतमिति मते जितमुडुपतिनेति रुमण्वतो विषयो राज्ञो रत्नावलीलाभश्च सूचितः ।

## 2.9 सन्दर्भग्रन्थाः


1. रत्नावली, चौखाम्भा संस्कृत भवन,वाराणसी,2004
2. नाट्यशास्त्रम्, चौखाम्भा संस्कृत भवन, वाराणसी
3. साहित्यदर्पणम्, चौखाम्भा संस्कृत भवन, वाराणसी
4. दशरूपकम्, चौखाम्भा संस्कृत भवन, वाराणसी

# अङ्ककथाः

## तृतीयांशः

संरचना


3.1 प्रस्तावना
3.2 उद्देश्यानि
3.3 प्रथमाङ्ककथा
3.4 द्वितीयाङ्ककथा
3.5 तृतीयाङ्ककथा
3.6 चतुर्थाङ्ककथा
3.7 सारांशः
3.8 शब्दकोशः
3.9 सन्दर्भग्रन्थाः
3.10 स्वावलोकनप्रश्नाः


### 3.1 प्रस्तावना

नटिकासु अत्यन्तप्रसिद्धा रत्नावली नाटिका महाकविना श्रीहर्षेण प्रणीता । नाटकेस्मिन् चत्वारः अङ्काः सन्ति । प्रथमे अङ्के नायिकायाः सागरिकायाः उदयनस्य संज्ञानम् मुख्योंऽशः । तदनन्तरं तदनुगुणं कथायाःयथोचितम् अङ्कत्रये सविभागः कृतः । इयं नाटिका न केवलं सहृदयान् प्रत्युत रूपकशास्त्रग्रन्थकर्तृणपि आचकर्ष । तादृश नाटिकायाः अङ्ककथान् अत्र समालोच्यन्ते ।

### 3.2 उद्देश्यानि

**एतस्याध्यनानन्तरं छात्रः अधोनिर्दिष्टचेष्टान् कर्तुं शक्नोति -**

- छात्रः प्रत्येकस्याङ्कस्य कथामवगच्छन्ति ।
- छात्रः सन्धिलक्षणं कथायां समन्वयं कुर्वन्ति ।
- छात्रः अर्थोपक्षेपकेषु ज्ञानं प्राप्नुवन्ति ।
- छात्रः एकैकनान्दीश्लोके एकैकाङ्ककथां क्रमशः समन्वयं कर्तुं प्रभवन्ति ।
- उद्धरणयोग्यानां श्लोकानां वाक्यानां च चयनं कृत्वा लिखितुं शक्नुवन्ति ।

## 3.3 प्रथमाङ्ककथा

उदयनः कौशाम्बी देशस्य महाराजः । राजा उदयनः सचिवायत्तसिद्धः । अतः तस्य राज्ञः अभ्युदयाय श्रेयसे च सर्वदा बद्धदीक्षः तदनुगुणं कार्यं स्वयमेव विधाय अपेक्षानुरोधेन राज्ञे सूचयति । **'राज्यं निर्जित शत्रुः योग्यसचिवे न्यस्तः समस्तो भरः'** (प्र.अ. 9) इति स्वयमेव स्वस्य सचिवायत्तसिद्धित्वं प्रकाशयति ।

अयं यौगन्धरायणः ज्योतिर्विज्ञानिभ्यः सिद्धपुरुषेभ्यः ' **यः सिंहलेशराज्पुत्र्याः रत्नावल्याः पाणिं ग्रहिष्यति सः चक्रवर्ती भविष्यतीति** ' निवेदनं श्रुत्वा स्वराज्ञः अभ्युदयकाङ्क्षीभूत्वा तदनुगुणप्रयत्नेषु प्रथमम् उदयनस्य राज्ञी वासवदत्ता '**लावणक ग्रामे अग्नौ दग्धा**' इति वार्तां सर्वत्र प्रसारयामास । तां वार्तामुररीकृत्य यौगन्धरायणः सिंहलदेशराज्ञे, स्वकन्या रत्नावली राज्ञे उदयनाय विवाहार्थं प्रदेय इति प्रस्तावं प्रेषयामास । सिंहलराज्ञः अपि तं प्रस्तावमङ्गीकृत्य कञ्चुकिसहायेन प्रधानमन्त्रिना बाभ्रव्येन साकं वसुभूतिना रत्नावलीं कौशाम्बीमनुप्रेषयामास । समुद्रमार्गे प्रवहणभङ्गः जायते । तथा प्रवहणमग्ना रत्नावली कथमपि दैववशात् काष्टफलकसहायेन सागरात् निर्गता । बहिर्निर्गता सा सागरिका उदयनस्य सेनापतिना वाणिज्योपजीविना वणिजा रुमण्वता दृष्टा । रुमण्वानपि राज्ञः यौगन्धरायणाय समर्पिता । उदयणस्य अभ्युदयाय कोशलदेशस्य पराजयाय यौगन्धरायणेनैव प्रेषितः सेनापतिः तस्मै सेनाधिपतये सिंहलराजकन्या रत्नावली लब्धा । ते वणिजः तां रत्नावलीं यौगन्धरायणे समर्पयामास । यौगन्धरायणः रत्नावलीं सम्भूषितां तां सागरात् लब्धा इति हेतोः सागरिका इति नामान्तरीकृत्य चातुर्यतया देव्याः वासवदत्तायाः सहायकां चकार । एतादृशनेपथ्येन रत्नावली इति नाटिका प्रारभ्यते ।

**स्वावलोकनप्रश्नाः**

1. राज्ञः नाम किम् ?

2. उदयननरेन्द्रस्य देशस्य नाम ?

3.यौगन्धरायणः कः ?

**पादाग्रस्थितया ....... पातु वः ।**
**औत्सुक्येन कृत त्वरा ........ शिवायास्तु वः ।**
**क्रोधेद्धैः दृष्टिपातैः ........... पातु देव्यै शिवो वः ।**
**जितमुडुपरिना ................ नरेन्द्रचन्द्रा । इति**

चतुर्भिः नान्दीश्लोकैः चत्वारोऽङ्काः गर्भिततया संसूचिताः । रूपकस्य प्रारम्भे प्रस्तावनायां सूत्रधारसम्भाषणद्वारा विधेः प्राबल्यं अनुकूलौ विधौ सर्वमभिमतं जटिति सेत्स्यति इति रूपकर्ता निरूपयति । तद्यथा –

**द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोप्यन्तात् ।**
**आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ।। 1.6**

अमुमेव श्लोकमनुवाचयन् यौगन्धरायणः प्रविश्य स्वराज्ञः हिताय किं किमाचरतीति सुष्टु निवेदयति । यथा –

**प्रारम्भेस्मिन्स्वामिनो वृद्धिहेतो**
**दैवेचेत्तं दत्तहस्तावलम्बे ।**
**सिद्धेर्भान्तिर्नास्ति सत्यं तथापि**
**स्वेच्छाचारी भीत एवास्मि भर्तुः ।। 1.7**

**अस्य श्लोकस्य भावं लिखत**

**द्वीपादन्यस्मादपि ....... विधिरभिमतमभिमुखीभूतः।।**

अत्रान्तरे नेपथ्ये कलकलध्वनिं श्रुत्वा –

**विश्रान्तविग्रहकथो रतिमाञ्जनस्य**
**चित्ते वसन्प्रियवसन्तक एव साक्षात् ।**
**पर्युत्सुको निजमहोत्सवदर्शनाय**
**वत्सेश्वरः कुसुमचाप इवाभ्युपैति ।। 1.8** इति

उदयनस्य प्रवेशं सूचयित्वा यौगन्धरायणः निष्क्रमति । वसन्तक नाम विदूषकः उदयनस्य सहायकः वसन्तोत्सवं सम्प्राप्तमिति कथने उदयनः मन्मथः इव प्रविशति ।

**राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः**
**सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।**
**प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं**
**कामः काममुपेत्ययं मम पुनर्मन्ये महानुत्सवः।। 1.9 ।।**

इति कथयन् प्रविश्य च वसन्तोत्सवस्य दर्शनानन्दं विदूषकेन सह अनुभूतवान् । वसन्तोत्सवे मदनिका चूतलतिका इत्यादि चेट्याः नृत्यन्ति गायन्ति च । उदयनस्य अनुमतिं स्वीकृत्य विदूषकोपि तत्र भागं गृह्णाति । गानानन्तरं मदनिका ‘ अद्य खलु मया मकरन्दोद्यानं गत्वा रक्ताशोकपादस्थले संस्थापितस्य भगवतः कुसुमायुधस्य पूजा निर्वर्तयितव्या, तत्र आर्यपुत्रेण सन्निहितेन भवितव्यमिति’ वासवदत्तायाः विज्ञापनं सूचयति । तदनुगुणं राजा तत्र गच्छति । तत्र वासवदत्तायाः आन्तरङ्गिकचेटी काञ्चनमाला पूजोपकरणहस्ता सागरिका च आगताः । वासवदत्ता पूजामुपक्रम्य पूजानिमित्तानि उपकरणानि आदिशति । सागरिका च एतद् सर्वं सज्ज इति आनीय ददाति । सन्दर्भेस्मिन् वासवदत्ता सागरिकायाः (रत्नावल्याः) अलौकिकं सौन्दर्यं दृष्ट्वा राज्ञः दृष्टिपथे यथा न गच्छेत् सा तथा विचिन्त्य सागरिकां सारिकायाः (पक्षिणी विशेषायाः ) रक्षणार्थं

जटिति गच्छ इति आदिशति । वसन्तोत्सवमन्मथं द्रष्टुकामा सागरिका तु सारिकां स्वसख्याः सुसङ्गतायाः हस्ते समर्पिता इति विचिन्त्य कुसुमानि अवशेष्यन्ती तिष्टति । सिंहलदेशे अनङ्गस्य अर्चना सारूप्यवैरूप्यं परिशीलयितुमपि इच्छति ।

अत्रान्तरे राजा अशोकवृक्षसमीपमागच्छति । वासवदत्ता राजानं स्वागतीकृत्य (तमेव राजानं मन्मथ इव पूजयति ) भगवन्तं कुसुमायुधं पूजयति । तदनु काञ्चनमाला सूचनानुश्रृत्य राजानमपि अर्चयति । तद् दृश्यं परिशीलयन्ती सागरिका स्वयमेव भगवान् मकरध्वजः समागतः अत्र, अस्माकं तातस्य अन्तःपुरे पुनः चित्रगतो अर्च्यते इति चिन्तयन्ती कुसुमायुधं पुष्पैः पूजयिष्यति । ‘ नमस्ते भगवान् कुसुमायुध,अमोघदर्शनः मे इदानीं त्वां भविष्यति’ इति मनसि चिन्तयित्वा तद्यावत् कोपि मां न प्रेक्षते तावदेव गमिष्यामि इति गन्तुमुद्युक्ता –

**अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवा-**
**वास्थानीं समये समं नृपजनः सायंतने संपतन् ।**
**संप्रत्येष सरोरुहद्युतिमुषः पादांस्तवासेवितुं**
**प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्षते।। 23 ।।**

इत्यादि नेपथ्ये वैतालिकवचनं श्रृत्वा आश्चर्यचकिता । किमयं स राजा उदयनो यस्याहं तातेन दत्ता इति चिन्तयन्ती गच्छति तस्मिन् अनुरक्ता सागरिका । राजा सन्ध्यां वर्णयन् वसन्तसेनया सह निष्क्रामति इति मदनमहोत्सवो नाम प्रथमाङ्ककथा ।

अस्य श्लोकस्य अन्वयक्रमः लुखन्तु -

| |
|---|
| **राज्यं निर्जितशत्रु ........................................ महानुत्सवः।** |

स्वावलोकनप्रश्नः

1. विदूषकस्य नाम

## 3.4 द्वितीयाङ्ककथा -

हास्याभिलाष विप्रलम्भश्रृङ्गारयोः मिश्रितोऽयम् अङ्कः वृत्तवर्त्तिष्यमानयोः कथयोः ससूचकेन प्रवेशकेन प्रारब्धः – यत्र अकालकुसुमसञ्जननदोहदेन पुष्पितायाः नवमालिकायाः कदलीगृहं प्रविष्टायाः विरहिण्याः सागरिकायाश्च वृत्तान्तः संसूचितः ।

प्रवेशके संसूचितरूपेण नवमालिकायाः दर्शनार्थम् आगतस्य राज्ञः उदयनस्य विरहिण्याः सागरिकायाः विचित्रसमागमः अत्र प्रदर्शितः ।

सागरिकायाः विरहसंपीडितायाः कदलीवनप्रवेशं ज्ञात्वा अन्विषन्ती सुसङ्गता कदलीवने प्रविश्य सागरिका **'आलोक्य समर्पितम् अभिमतं जनं प्रेक्षय यथा समीहितं करिष्यामि'** इति अन्यः दर्शनोपायः नास्तीति धिया अभिमतं प्रियम् आलेख्यगतं विधाय प्रेक्षिष्यते । तदृष्ट्वा सुसङ्गता ज्ञातसागरिकाहृदया उदयनस्य पार्श्वे **'अथवा न कमलाकरं वर्जयित्वा राजहंसी अन्यत्र अभिरमते'** इति चिन्तयन्ती  सागरिकायाः चित्रं लिखति । तद्धर्शनेन कुपिताम् ईर्ष्या कलुषितां सागरिकां यादृशः त्वया कामदेवः आलिखितः, तादृशी मया रतिः आलिखिता इति उक्त्वा सागरिकाहृदयगतम् उदयनविषयक अनुरागं सागरिकामुखात् विज्ञाय तयोः समागम आनुकूल्यं सम्पादयितुम् इच्छति । देव्या वासवदत्तया सारिकायाः रक्षणे नियुक्ता सागरिका पञ्जरस्थां तां कदलीगृहम् आनिनाय, यया सागरिकासुसङ्गतयोः समग्रं सम्भाषणं श्रुतं यत्र सागरिकायाः हृदयं सुस्पष्टम् ।

अत्रान्तरे कश्चनमत्तः प्लवङ्गः यथेच्छं भ्रमतीति सूचनया सभीते सागरिकासुसङ्गते ससंभ्रमात् चित्रफलकम् अगृहीत्वैव ततः निष्क्रान्ते । प्रभ्रष्टो प्लवङ्गः पञ्जरद्वारम् उद्घाट्य अन्यतो गच्छति ।

पञ्जरात् बहिर्गता सारिका यथावत् तानि वाक्यानि कस्यचित् वृक्षस्य शाखासु प्रलपति –

**दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।**
**प्रियसखि विषमं प्रेम मरणं शरणं न वरमेकम् ।।** इत्यादि

उदयनः श्रुत सारिकावचनः लब्धचित्रफलककः कापि सुन्दरी स्वस्मिन् उदयने अनुरक्तेति ज्ञास्यति । भ्रष्टस्य प्लवङ्गस्य निर्गमानन्तरं चित्रफलकमन्विष्य स्वीकर्तुम् आगते सागरिकासुसङ्गते विदूषकं राजानञ्च सम्मिलितः । तथा नायिकानायकयोः प्रारम्भिकः समागमः सुसम्पन्नः । राजा उदयनः –

**श्रीरेषा पाणिरप्यस्या पारिजातस्य पल्लवः।**
**कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवः।।** 18 ।। इति

सागरिकां प्रीणाति । तदा विदूषकः '**एषा खल्वपरा देवी वासवदत्ता'** इति वदति । राजा सचकितं सागरिकायाः हस्तं मुञ्चति । सागरिका ससम्भ्रमं सुसङ्गता सहायेन तमालवीथिकामन्तरयित्वा निष्क्रान्ते । परन्तु तत्र वासवदत्ता नागता इति ज्ञात्वा राजा पुनः विदूषकं पृच्छति । तदानीं पुनः विदूषकः तदेव कथयति '**भो न जानामि क्व सा । मया एषा खल्परा देवी वासवदत्ता** ' इति भणितमिति पुनः द्रढयति । तदा राजा –

**प्राप्ता कथमपि दैवात्कण्ठमनीतैव सा प्रकटरागा ।**
**रत्नावलीव कान्ता मम हस्ताद् भ्रंशिता भवता ।।** 19 ।। इति खेदं प्रकटयति ।

श्रीखण्डदासेन दत्तेन दोहदेन निरन्तरोद्भिन्न कुसुमगुच्छशोभिता नवमालिका देवी परिगृहीतां मालतीलताम् उपहसन्तीव विद्यामाना देव्याः वासवदत्तायाः मुखम् 'ईर्ष्याकषायितं करिष्याम्यहम् ' इति गर्वमुद्वहन् राजा एवं वक्ति –

**उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-**
**दायासं श्वसनोद्गमैरविरतैरातन्वतीमात्मनः।**
**अद्योद्यानलतामिमां समदनां गौरीमिवान्यां ध्रुवं**
**पश्यन्कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ।। 4 ।।**

| अस्य श्लोकस्य पदविभागं कुर्वन्तु – |
|---|
| |

काञ्चनमालाद्वारा ज्ञात नवामालिकावृत्तान्ता वासवदत्ता नवमालिकां द्रष्टुं तत्रागच्छति । तस्मिन् सन्दर्भे राजा वयस्यं विदूषकं चित्रफलकं प्रच्छादयितुं सूचयति । वासवदत्ता च कुसुमिता नवमालिका आर्यपुत्रेण दृष्टा वा इति पृच्छति । तदानीं राजा सहितावेव पश्यावः इति कथयति । वासवदत्ता –'आर्यपुत्र मुखरागादेव मया ज्ञातं यथा कुसुमिता नवमालिका' इति तत्सन्दर्भे विदूषकः आनन्देन 'ही ही भोः' इत्युक्त्वा बाहुप्रसार्य नृत्यति । नृत्यतः कक्षान्तरात् फलकः पतति । तत् फलकं गृहीत्वा काञ्चनमाला देव्यै वासवदत्तायै प्रदर्शयति । चित्रफलकं दृष्ट्वा कुपिता वासवदत्ता केन इदमलिखितमिति राजानं पृच्छति । राजा सचकितः विदूषकं पश्यति। विदूषकः आत्माखिल दुःखेन आलिख्यते इति मम वचनं श्रुत्वा प्रियवयस्येनैव तल्लिखितमिति कथयति । राजा यथा आह वसन्तकः तथैव एतदिति वक्ति । चित्रफलकस्थां सागरिकां प्रदर्श्य इयं किं वसन्तकस्य विज्ञानमिति पृच्छति । तत्सन्दर्भे राजा सचकितः 'इयं हि कापि कन्यका स्वचेतसा एव परिकल्प्य आलिखिता न तु दृष्टपूर्वा ' इति कथमपि प्रच्छन्नं गोपयितुं प्रयतते । वासवदत्ता रोषकषायिता 'मम पुनः एतत् चित्रफलकं प्रेक्षमानायाः शीर्षवेदना समुत्पन्ना इति प्रस्थिता,' राजा पटान्ते गृहीत्वा –

**प्रसीदेति ब्रूयामिदमसति कोपे न घटते**
**करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः ।**
**न मे दोषोऽस्तीति त्वमिदमपि च ज्ञास्यसि मृषा**
**किमेतस्मिन्वक्तुं क्षममिति न वेद्मि प्रियतमे।। 20 ।।**इति

तां सान्त्वयितुं प्रयतते । वासवदत्ता तु 'मा अन्यथा सम्भावय सत्यमेव मां शिरोवेदना बाधते' इत्युक्त्वा गमिष्यति ।

एवं अङ्कोयं द्वितीयकः अभिलाषेर्ष्याविप्रलम्भश्रृङ्गारयोः रसयोः हास्यस्य च सम्यक् पोषणेन अत्यन्तं हृद्यः विलसति। अयमेव कदलीगृहोनाम द्वितीयोऽङ्कः।

**स्वावलोकनप्रश्नाः**

1. सारिका नाम का ?

2. काञ्चनमाला का ?

3. अस्य अङ्कस्य नाम किम् ?

## 3.5 तृतीयाङ्ककथा

राजा उदयनः अस्वस्थशरीरः इति ज्ञात्वा (परामृश्य च) वासवदत्ता राज्ञः अस्वस्थतां परामष्टुं प्रेषितायाः काञ्चनमालायाः, आगमनविलम्बे कारणं ज्ञातुं प्रेषितायाः मदनिकायाः च सम्भाषणद्वारा वेषपरिवर्तनेन सागरिकाउदयनयोः रहसि समागमः वेषपरिवर्तन प्रयत्नपूर्वकः संसूचितः अङ्कस्यास्य अर्थोपक्षेपके प्रवेशके।

चित्रफलकवृत्तान्तेन ज्ञात रहस्य सागरिकानुरागकः राजा उदयनः तां विचिन्तयन् मदनपीडामनुभवति।

**मनश्चलं प्रकृत्यैव दुर्लक्ष्यं च तथापि मे।**
**कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः** ।। 2 ।। इति

आत्मनः मदनावस्थां प्रकाशयति। स्वात्मनः अवस्थां विचिन्तयन् सागरिकां संस्मरति, अनुचिन्तयति यथा –'अन्तर्निगूढ कोपसंरम्भाया देव्या लोचनगोचरतां तपस्विनीं सागरिकाम्' एवं विधा समावस्थाम्। प्रतीक्षते च राजा उदयनः तद्वार्तान्वेषणाय गतं विदूषकम्। राज्ञः प्रियवसन्त इव अभिमतः वसन्तकः विदूषकः वेषपरिवर्तनेन सागरिका राजानं उदयनं सङ्केतस्थाने मिलिष्यति इति

अत्यन्तपरितोषदायकां वार्तां दधाति । प्रियायाः सागरिकायाः माधवीलतामण्डपे सङ्केतावसरं प्रतिपालयन् निरीक्षते । विदूषकेन सूचितरीत्या अन्धकारबहुलेमार्गे विविधलतापुष्पगन्धास्वादनं कुर्वन्तौ लतामण्डपं गत्वा तत्र मरकतशिलावेदिकायामुपविश्य सङ्केतसमयं प्रतिपालयन्, विदूषकं सागरिका कियदागता इति ज्ञातुं प्रेषितं चिरन्तं विचिन्तयन् – तत्किं नु खलु विदितः स्यादयं वृत्तान्तः देव्या ( वासवदत्तया) इति शङ्कते ।

| |
|---|
| **मनश्चलं ...................................................शिलीमुखैः ।**<br>**अस्य श्लोकस्य भावं लिखन्तु –** |

सागरिका वासवदत्तावेषं धृत्वा राजानमभिसरिष्यति । इति विज्ञाय तत्परिशीलितुं काञ्चनमालया सह सङ्केतस्थानं चित्रशालिकाद्वारा आगच्छति । सागरिकां स्वीकृतवासवदत्ता वेषमानेतुं गतः विदूषकः पदशब्दं श्रुत्वा काञ्चमालां धृत काञ्चनमालां रूपं सुसङ्गतां मत्वा सुसङ्गतया इव सम्भाषते । वासवदत्तामपि धृतसागरिकामिति मनुते । वक्ति च ‘ एषा स्पुटमेव देवी वासवदत्ता ’ इति सम्भावयति । ‘ त्वरतां त्वरतां ’ इति कथयन् राज्ञः समीपमानयति । वक्ति च राजानमुद्दिश्य – ‘भो वयस्य दिष्ट्या वर्धसे एषा खलु सागरिका मया आनीता’ इति राजा च आगतां नायिकां सागरिका इति मत्वा तस्याः अङ्गप्रत्यङ्गानि एवं वर्णयति –

**शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ**
**रम्भागर्भनिभं तथोरुयुगलं बाहू मृणालोपमौ ।**
**इत्याह्लादकराखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य मा-**
**मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय ।। 11 ।।** इति

तां मधुरालापैः प्रोत्साहयति । विदूषकोऽपि तथैव निष्ठुरायाः देव्याः वासवदत्तायाः दुष्टवचनैः कटुकिते श्रोत्रे साम्प्रतं सुखयतु तव मधुरवचनोपन्यासः इति । एतादृशवचोसरण्या खिन्ना वासवदत्ता

अवगुण्ठनमपनीय सरोषं सागरिकोक्षिप्तहृदयः सर्वमेव सागरिकामयं प्रेक्षसे इति राजानं वक्ति ।

| |
|---|
| **शीतांशुर्मुखमुत्पले .................................... निर्वापय ।**<br>**श्लोकस्य पदविभागं कुरुत –** |

ससम्भ्रमितः राजा तथैव विदूषकः क्षमां प्रार्थयतः । तथापि वासवदत्ता अतीव निष्ठुरा देव्याः पादयोः पतितं राजानमपि उज्जित्वा गच्छति । काञ्चनमालया एवं चरणपतितं महाराजम् उज्जित्वा गतायाः देव्याः अवश्यं पश्चात्तापेनन भवितव्यमिति सूचनामपि तिरस्कृत्य हठात् गच्छति । राजा तु च तथागतां देवीम् –

**समारूढा प्रीतिः प्रणयबहुमानादनुदिनं**
**व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया ।**
**प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ**
**प्रकृष्टस्य प्रेम्णः स्खलितमविसह्यं हि भवति ।। 15 ।।** इति

चिन्तयति । तदानीं विदूषकः 'पृष्टा देवी किं करिष्यतीति न जानामि, सागरिका पुनः दुष्करं जीविष्यतीति तर्कयामि' इति राज्ञः चिन्तनं सागरिकामनुप्रसारयति ।

वासवदत्तावेषधारिणी सागरिका 'वरमिदानीं स्वयमेव आत्मानमुद्बुध्योपपरता न पुनः ज्ञतसंकेतवृत्तान्तया देव्या परिभूतास्मि 'इति विचिन्त्य 'अशोकपादपं गत्वा यथा समीहितं करष्यामि' इति गन्तुमुद्युक्ता । तद् पदध्वनिं श्रुत्वा विदूषकः वासवदत्ता पश्चात्तापेन पुनः देवी आगता भवेदिति चिन्तयति । सागरिका माधवीलतापाशं विरचय्य आशोकपादपे आत्मानमुद्बुद्य व्यापादयामि इत्युक्त्वा तदर्थम् उद्युक्ता । विदूषकः तां दृष्ट्वा वासवदत्ता आत्महत्याय प्रयतते इति भीत्या राजानं परित्रायस्व इति

आह्वयति । राजा झटिति उपसृत्य तत्प्रयत्नात् वासवदत्ता वेषधारिणीं सागरिकां रक्षति । सागरिका राजानं दृष्ट्वा पुनरपि मे जीविताभिलाषः संवृत्तः इति, अथवा एनं प्रेक्ष्य कृताध्र्वाभूत्वा सुखेनैव जीवितं परित्यजामि इति चिन्तयन्ती 'मुञ्चतु मुञ्चतु मां भर्ता एतादृशः अवकाशः पराधीनायाः मम पुनः न लक्ष्यते' , इति कण्ठे पाशं दातुमिच्छति । राजा तु तां कथं प्रिया मे सागरिका इति कण्ठात् पाशमाक्षिप्य तया साकां मृदुभाषते ।

अत्रान्तरे काञ्चमालयासह वासवदत्ता पश्चात्तप्तहृदया राजानां प्रसादयितुमागच्छती, राज्ञा उदयेन सागरिकामुद्धिश्य कृतानि प्रियालपनानि श्रुत्वा मामुद्धिश्यैव एवं तिन्तयतीति – आनन्दं प्राप्नोति । परन्तु राजा सागरिकां प्रणयितुम् –

**श्वासोत्कम्पिनि कम्पितं कुचयुगे मौने प्रियं भाषितं**
**वक्त्रेऽस्याः कुटिलीकृतभ्रुणि तथा यातं मया पादयोः।**
**इत्थं नः सहजाभिजात्यजनिता सेवैव देव्याः परं**
**प्रेमाबन्धविवर्धिताधिकरसा प्रीतिस्तु या सा त्वयि।। 18** इति

वक्ति वासवदत्ता अत्यन्तं हृष्टा राज्ञः सकाशम् आगच्छति । राजा वेषसादृश्यात् वयं विप्रलब्धाः इति कथयित्वा आत्मानमाद्रापराधात् रक्षितुमिच्छति, पादयोः पतति च । वासवदत्ता अत्यन्तं कृद्धा लतापाशेन विदूषकं बन्धयित्वा सागरिकाम् अग्रतः कृत्वा नेतुं काञ्चनमालामादिशति । सागरिका 'हा धिक् कथमाकृतपुण्यया मया मर्तुमपि आत्मनः इच्छायाः न पारितमिति विषादमनुभवति ।' राजा तथा रूष्टां वासवदत्तां प्रसादयितुमभ्यन्तरमेव प्रविशामि इति कथय निष्क्रान्तः । सङ्केतो नाम तृतीयोऽङ्कः ।

**स्वावलोकनप्रश्नः**

1. तृतीयाङ्कस्य नाम किम् ?

## 3.6 चतुर्थाङ्ककथा

असमानसुनदर्यापि दयनीयदशामनुभवत्यां सागरिकया 'यस्मै कस्मै चित् ब्राह्मणाय देहि ' इति दत्तां रत्नमालां स्वीकृत्य सुसङ्गता विषन्नहृदया ब्राह्मणमन्विषती वसन्तकं विदूषकं दृष्ट्वा तस्मै सागरिकायाः इच्छानुसारं रत्नमाला प्रदातुं चिन्तयति । वसन्तकोऽपि सागरिका समावस्थां प्रापितः राज्ञः उदयनस्य प्रार्थनया वासवदत्तायाः विमुक्तः आनन्देन राजानं मिलितुमिच्छति । तं विदूषकं सुसङ्गता रुदती उपसृत्य 'देव्या वासवदत्तया सागरिका अर्धरात्रे उज्जयिनीं नीयते ' इति प्रवादं कृत्वा कुत्र नीता इति न ज्ञायते, इत्युक्त्वा सागरिकायाः उद्देसानुसारं रत्नमालामनिच्छन्तमपि तं ग्राहयति । विदूषकस्तु सागरिका विरहदुःखितस्य विनोदाय राज्ञे दातुमिच्छति । सामान्यजनदुर्लभपरिदानुमानेन सा (सागरिका) महाकुलप्रसूता स्यादिति निश्चित्य विदूषकः ' राजा देवी भवनान्निष्क्रम्य शिलामण्डपे अस्तीति सुसङ्गता मुखात् ज्ञात्वा तत्र गच्छति ।' वृत्तवर्तिष्यमानं वृत्तान्तज्ञापके प्रवेशके अयं विषयः प्रस्तुतः।

राजा उदयनः ' इदानीं देव्यां प्रसन्नायां सागरिका चिन्तैव केवला मां बाधते ' इति सोत्कण्ठं एकाकी दुःखमनुभवति । तदा आगतं विदूषकं दृष्ट्वा ससन्तोषमालिङ्ग्य सागरिकायाः वार्ता जिज्ञासते । सागरिका उज्जयनीं प्रेषिता इति श्रुत्वा दुःखितं राजानं सान्त्वयितुमिव सागरिका दत्तां रत्नमालाम् उदयनाय ददाति । रत्नमालां वा दृष्ट्वा धृतिं प्राप्नुमः इत्युक्त्वा उदयनः तां विदूषकं धर्तुं कथयति ।

अत्रान्तरे वेत्रहस्ता वसुन्धरा रुमन्वतः भागिनेयः विजयवर्मा किमपि प्रियं निवेदितुकामः इति सूचयति । राज्ञः अनुमत्या प्रविष्टो विजयवर्मा कोसलाधिपतिः जितः इति वृत्तान्तं विस्तरतः श्रुत्वा 'साधु कोसलपते साधु !मृत्युरपि ते श्लाग्यः यस्य शत्रवोऽपि एवं पुरुषकारं वर्णयति ' इति अभिनन्द्य ' यौगन्धरायणः अस्य मत्प्रसादो दीयतामिति वसुन्धरां सूचयित्वा ' निष्क्रामयति ।

तदनु वासवदत्तया प्रेषितः ऐन्द्रजालकः काञ्चनमालयासह राजानमुपसर्पति । राज्ञः औत्सुक्यं वर्धयन् ऐन्द्रजालकः –

**किं धरण्यां मृगाङ्क आकाशे महीधरो जले ज्वलनः ।**
**मध्याह्ने प्रदोषो दर्श्यतां देह्याज्ञप्तिम् ।। 8 ।।**

**मम प्रतिज्ञैषा यद्यद् हृदयेनेहसे संद्रष्टुम् ।**
**तत्तद्दर्शयाम्यहं गुरोर्मन्त्रप्रभावेण ।। 9 ।। इति**

राजा च देवीं वासवदत्तामपि इन्द्रजालं द्रष्टुमाह्वयति । एवमुदयनः,वासवदत्ता, विदूषकः, काञ्चनमाला च ऐन्द्रजालकस्य नैपुण्यं पश्यन्ति ।

**एष ब्रह्मा सरोजे रजनिकरकलाशेखरः शंकरोऽयं**
**दोर्भिर्दैत्यान्तकोऽसौ सधनुरसिगदाचक्रचिह्नैश्चतुर्भिः ।**
**एषोऽप्यैरावतस्थस्त्रिदशपतिरमी देवि देवास्तथान्ये**
**नृत्यन्ति व्योम्नि चैताश्चलचरणरणन्नूपुरा दिव्यनार्यः।।11।।**

इति निर्वहणे अद्भुतमिति सूचितरीत्या इन्द्रजालद्वारा अद्भुतस्य रसस्य सन्निवेशे सति, वसुन्धरा 'एषः खलु विक्रमबाहोः प्रधानामात्यः वसुभूतिः बाभ्रव्येन कञ्चिकिनासह आगतः'। तदर्हति देवः अस्मिन्नेव सुन्दरमुहूर्ते प्रेक्षितुम् । अहमपि कार्यशेषं समाप्य आगत एव । इति यौगन्धरायणस्य सूचना आनयति । मातुलगृहात् प्राधानामात्यः वसुभूतिः आगतः तं तावत् प्रेक्ष्यताम् आर्यपुत्रः इति वासवदत्ता सूचनामनुश्रुत्य ऐन्द्रजालकं निष्क्रामयति । ऐन्द्रजालकस्तु निष्क्रामन् 'एकः पुनः मम खेलः अवश्यं देवेन प्रेक्षितव्यः' इति कथयति । राज्ञः सूचनामनुश्रुत्य विदूषकः प्रत्युद्गम्य वसुभूतिं बाभ्रव्यञ्च आनयति । तत्सन्दर्भे विदूषककण्ठे धृतां रत्नमालां दृष्ट्वा वसुभूतिः बाभ्रव्यम् 'इयं रत्नमाला या देवेन राजपुत्र्यै प्रस्थानकाले दत्ता' इति स्मारयति । राज्ञः वसुभूतेः बाभ्रव्यस्य च आदराह्वानासनग्रहणानन्तरं वासवदत्ता ज्येष्टां प्रणमति ।

राजनि उदयने अपि कुशलं तत्र भवतः सिंहलेश्वरस्य इति पृष्टे सति, तस्य सिंहलेश्वरस्य दुहितरं (सागरिकां) प्रवहणमग्ना स्मृत्वा दुःखं प्राप्नोति । वासवदत्तापि तां श्रुत्वा उद्विग्ना ।

उदयनः दुरवगाहा गतिः देवस्य। यानभङ्गपतितोत्थौ नन्वतौ एतावेव निदर्शनं इति देवीं वासवदत्तां समास्वाशयति । अत्रान्तरे पुनः नेपत्ये 'एषा प्रोषार्थयोषित् जनः इह सहसैव उत्थितो अन्तःपुरे अग्निः' इति

**देवीदाहप्रवादोऽसौ योऽभूल्लावाणके पुरा।**

**करिष्यन्निव तं सत्यमयमग्निः समुत्थितः।। 15 ।।** इति श्रुत्वा सर्वे सम्भ्रान्ताः । ससंभ्रमात् वासवदत्ता 'एषा खलु मया निर्घुणया निगडेन संयमिता सागरिका विपद्यते।' 'तत्तां परित्रायताम् आर्यपुत्रः' इति कथयति। 'कथं देवि! सागरिका विपद्यते एष गच्छामि ' इति राजा अग्नौ प्रविशति । अग्नौ प्रविष्टं राजानं दृष्ट्वा ससम्भ्रमात् वासवदत्ता,विदूषकः,वसुभूतिः, बाभ्रव्यश्च अग्नौ प्रविशन्ति।

सागरिका परितः अग्निज्वालाः दृष्ट्वा 'हा धिक् समन्ततः प्रज्वलितो हुतवहः' इति स परितोषमद्य हुतवहो धिष्ट्या करिष्यति मम दुःखावसानमिति विचिन्तयति।

राजा तादृशीं सागरिकां दृष्ट्वा 'अयि प्रिये किमद्यापि संभ्रमेस्वस्थया इव अवस्थीयते' इति तां रक्षितुमुद्युक्तः । सागरिका राजानं दृष्ट्वा 'संवृत्तजीविताभिलाषा परित्रायतां परित्रायतां भर्ता इति कथयन्तीं 'नयामि भवतीमितः प्रियतमे अवलम्बस्व माम्' इति तां कण्ठे कृत्वा स्वस्पर्शसुखमनुभवति। अत्रान्तरे आश्चर्यतया अग्निः क्षणात् अन्तर्हिता । वासवदत्तायाः राज्ञः सागरिकायाः अक्षतशरीरं दृष्ट्वा आनन्दं प्रकटयति। राजा स्वप्ने मतिभ्रमति किमिदमिन्द्रजालं' इति सम्भावयति । विदूषकश्च द्रढयति । वसुभूतिः बाभ्रव्यश्च तां सागरिकां सिंहलेश्वर दुहितरं विदित सङ्केतैः ज्ञात्वा तस्याः अन्तःपुरे प्रवेशादिकं च संचिन्त्य सर्वमिदं राज्ञः चक्रवर्तित्वलाभाय यौगन्धरायणेनैव विहितमिति जानन्ति । सूचनां विना एतत्सर्वं कृतवता यौगन्धरायणेन क्षमा याचिता । ऐन्द्रजालिक वृत्तान्तोपि यौगन्धरायणस्य प्रयोगः इति ज्ञायते सर्वैरपि । वासवदत्ता सागरिकामात्मीयां स्वीकृत्य राज्ञे समर्पयति। विदूषकः ही ही भोः पृथ्वी खलु इदीनीं हस्तगता प्रियवयस्य'।

**बीजवन्तो मुखाद्यर्थाः विप्रकीर्णा यथायथम् ।**
**ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ।। इति**

एवं दशरूपके उक्तरीत्या अन्ते तावत् रत्नावली नाटिकायामपि अद्भुतरसः दृश्यते । तथैव सागरिकावसुभूतिबाभ्रव्यादीनामर्थानां मुखसन्ध्यादिषु प्रकीर्णानां वत्सराजैककार्यार्थत्वम् नाम चक्रवर्तित्वं सुसम्पन्नम् । ऐन्द्रजालिको नाम चतुर्थोऽङ्कः ।

**स्वावलोकनप्रश्नाः**

1. निर्वहणसन्धिलक्षणम् किम्

2. चतुर्थाङ्कस्य नाम किम्

## 3.8 सारांशः

पादाग्रस्थितया इति प्रथमनान्दी श्लोके पादाग्र इति विशेषणेन कौतूहलेन लतागृहे स्थित्वा उदयनं द्रष्टुं निरीक्षणं कृतवत्याः सागरिकायाः स्वभावः उक्तः । तस्याः मौढ्यं व्रीडा च अभिव्यज्यते ।

औत्सुक्येन इति द्वितीयनान्दी श्लोके औत्सुक्येन इत्यत्र नायकदर्शन औत्सुक्येन नायकस्य चित्रलेखनं द्वितीयाङ्के दृश्यते । तदनु ह्रिया लज्जया व्यावर्तमाना तस्याः सुसङ्गतायाः प्रोत्साहणेन नायकसमागमे अभिलाषं वर्धयति । नायकाभिमुख्यम् आनयति । इत्याद्यंशाः द्वितीयाङ्ककथायाम् उक्तः ।

उदयनसागरिकयोः अनुरागं ज्ञात्वा कृद्धाः देव्याः वासवदत्तायाः स्वरूपं स्वभावञ्च तृतीये नान्दीश्लोके वर्णितः । अनन्तरं चतुर्थे नान्दी श्लोके राज्ञः उदयनः चक्रवर्तित्वलाभादि विशेषाः अभिवर्णिताः । एवं प्रकारेण अत्र अङ्ककथायां चर्चिताः ।

# पात्रचित्रणम्
# चतुर्थांशः

## संरचना

4.1 प्रस्तावना
4.2 उद्देश्यानि
4.3 पात्रचित्राणि
4.3.1 उदयणः
4.3.2 रत्नावली
4.3.3 वासवदत्ता
4.3.4 यौगन्धरायणः
4.4 सारांशः

## 4.1 प्रस्तावना

रूपकेषु विविधपात्राणां चित्रणं कविभिः सोदात्ततया कल्प्यते। तेषां पात्राणां स्वभावचित्रणाय उचितवेषधारण, तदुचितसम्भाषण-शैलीं च कवयः कल्पयन्ति । तदा करणेन तत् पात्राणाम् औचित्यगुण-गरिमादयः सहृदयान् आकर्षन्ति ।

**'अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम्'** इति आनन्दवर्धनस्य वचनानुसारं तत्तत् पात्रौचित्यम् अवश्यं पालनीयं स्यात् । तेन च ब्रह्मानन्दसब्रह्मचारिणः रसस्य परिपुष्टिः भवति ।

## 4.2 उद्देश्यानि –

**एतस्याध्यनानन्तरं छात्रः अधोनिर्दिष्टचेष्टान् कर्तुं शक्नोति –**

- नायकस्य साधारणलक्षणानि लिखितुं प्रभवन्ति ।
- दक्षिणनायकस्य लक्षणम् उदयने परिशीलयन्ति ।
- वासवदत्तायाः सागरिकायाश्च पात्रयोः चित्रणे सामाञ्जस्यम् उदाहर्तुं शक्नुवन्ति ।

- यौगन्धरायणस्य इव स्वामिभक्तिरूपलक्षणानि पाठकाः (विद्यार्थिनः) स्व स्वकर्मसु प्रयोक्तुं शक्नुवन्ति ।

## 4.3 पात्रचित्राणि

**4.3.1 उदयणः –** रत्नावली नाटिकायायाः नेता उदयनः ।

**नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।**
**रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ।।**

**बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।**
**शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ।।** इति

नेतृ सामान्यलक्षणैः साकं विशेषलक्षणान्यपि अस्मिन् नायके दरीदृश्यते । लाक्षणिकग्रन्थानुसारं नाटिकायाः नायकः धीरललितः तथा दक्षिणश्च भवति । तद्यथा –

**नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।**
**प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ।।**
**स्यादन्तःपुरसम्बद्धा सङ्गीतव्यपृताऽथवा । इति**

अयम् उदयनः सचिवायत्तसिद्धो धीरललितः दक्षिणश्च नायकः ।

**राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः**
**सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः ।**
**प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं**
**कामः काममुपेत्ययं मम पुनर्मन्ये महानुत्सवः ।।1. 9 ।। इति**

समस्तोऽपिभारः राज्यविषयकः योग्यसचिवे यौगन्धरायणे निक्षिप्य निश्चिन्तसन् सुखीभूत्वा कलासु आसक्तिं प्रदर्शयति । विषयोऽयं रूपकस्य प्रारम्भादेव ज्ञायते । यौगन्धरायणश्चापि विषयममुम् एवं द्रढयति । अयं अत्यन्त सुन्दरः कलाप्रियश्च ।

**विश्रान्तविग्रहकथो रतिमाञ्जनस्य**
**चित्ते वसन्प्रियवसन्तक एव साक्षात् ।**
**पर्युत्सुको निजमहोत्सवदर्शनाय**
**वत्सेश्वरः कुसुमचाप इवाभ्युपैति ।। 1.8 ।।** इति

एवमेव अहो निर्भरः क्रीडारसः परिजनस्य इति प्रथमाङ्के राजा उदयनः स्वयम् उदयनमहोत्सवम् आस्वादयति । एवमेव चतुर्थाङ्केऽपि 'अस्ति नः कौतूहलम् इन्द्रजाले' इति कथयन् विविधकलासु स्वानुरागं सूचयति । विदूषकमपि वसन्तक्रीडासु भागं ग्रहीतुं प्रेरयति ।

अयं राजा उदयनः सुखे अत्यन्तानुरागी । अत एव वासवदत्तां देवीं नूतनां प्रियां सागरिकां च सुसम्यक् अनुनयति । उभयत्रापि समानानुरागं प्रदर्श्य सुखमनुभोक्तुं प्रयतते । 'अनेकासु नायकासु समानानुरागी एव दक्षिणनायकः' । अयमत्यन्तं मृदुव्यवहरति । तस्याः पादयोरपि पतति प्रसादाय । एवमेव सागरिकां प्रीणयितुम् –

**इत्थं नः सहजाभिजात्यजनिता सेवैव देव्याः परं**
**प्रेमाबन्धविवर्धिताधिकरसा प्रीतिस्तु या सा त्वयि।। 3.18 ।।**

इति

एतस्य मणिमन्त्रौषधीषु अधिकविश्वासः । अत एव नवमालिकायाः त्वरितदोहदाय औषधीनां प्रयोगं कृत्वा –

**अद्योद्यानलतामिमां समदनां गौरीमिवान्यां ध्रुवं**
**पश्यन्कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ।। 2.4 ।।**

**कण्ठे श्रीपुरुषोत्तमम्य समरे दृष्ट्वा मणिं शत्रुभि-**
**र्नष्टं मन्त्रबलाद्वसन्ति वसुधामूले भुजङ्गा हताः।**
**पूर्वं लक्ष्मणवीरवानरभटा ये मेघनादाहताः**
**पीत्वा तेऽपि महौषधेर्गुणनिधेर्गन्धं पुनर्जीविताः।।2.5।।**इति

वृद्देषु इव बृत्येष्वपि आदरः यदा उदयनः अमात्यादिषु वृद्देषु आदरं प्रदर्श्यति । यदा वसुभूतिः कोसलेश्वरस्य प्रधानात्यः आगतः तदा 'आसनम् आसनम् आर्याय' इति कथयति । एवमेव सुसङ्गतादि चेष्टीष्वपि आदरं प्रदर्श्यति । 'सुसङ्गते स्वागतम् इह आस्यताम्' इति।

एव चतुर्थाङ्केऽपि सर्वसिद्धिर्नाम ऐन्द्रजालकः आगच्छति । तदा तम् ऐन्द्रजालकं 'भद्र' इति सम्बुध्नाति ।

शत्रुगुणकीर्तनम् – यदा स्वसेनापतिः कोसलदेशस्य राज्ञः जयानन्तरं कोसलाधिपतेः वीरमरणं प्रस्तौति तदानीं राजा उदयनः 'साधु कोसलपते साधु मृत्युरपि ते श्लाघनीया' इति शत्रुं संस्तौति ।

## 4.3.2 रत्नावली

नाटिकायां नायिका सागरिकेति नाम्ना व्यवह्रियमाण सिंहलदेशस्य दुहिता अत्यन्तसुन्दरी रत्नावली । इयं मुग्धा नायिका रूपवती च ।

मदनमहोत्सवे वासवदत्तया पूज्यमाणं राजानं दृष्ट्वा 'कथं प्रत्यक्ष एव भगवान् कुसुमायुध इह पूजां प्रतीच्छति' इति कथनेन एतस्याः अति मुग्धत्वम् अभिव्यज्यते । अयं मदनोत्सवः सिंहलेषु मूर्तेः क्रियते इति संस्मृत्य अत्र तु साक्षात् भगवान् एव कुसुमायुधः पूजां स्वीकरोतीति चिन्तनम् । तस्याः मुग्धात्वस्य प्रमाणम् । इयं रूपलावण्येषु वासवदत्ता सदृशी । अत एव ' एषा खलु अपरा वासवदत्ता' इति विदूषकेन संस्तुता । एतस्याः रूपलावण्यं च दृष्ट्वा वासवदत्ता यथा इयं राज्ञः पुरतः न गच्छेत् तथा प्रयतते । 'यस्यैव दर्शनपथात्प्रयत्नेन रक्ष्यते तस्यैव दृष्टिगोचरे पतिता भवेत् ' इति विचिन्त्य मन्मदपूजायाः समीपात् ताम् अन्यत्र प्रेषयति ।

यदा सागरिका वासवदत्तया कुत्र बद्धा इति आज्ञाता तस्याः अदर्शनेन संवेदिता सुसङ्गता अपि 'हा प्रियसखि सागरिके ! हा लज्जावति ! हा उदारशीले ! हा सखीजनवत्सले ! हा सौम्यदर्शने ! कुत्रेदानीं त्वं मया प्रेक्षितव्या। (इति रोदिति। ऊर्ध्वमवलोक्य निःश्वस्य च।) अयि दैवहतक अकरुण असामान्यरूपशोभा तादृशी त्वया यदि निर्मिता' इत्येवं सागरिकायाः सौन्दर्यं पुनः पुनः प्रस्तौति । एवं राजापि –

**लीलावधूतपद्मा कथयन्ती पक्षपातमधिकं नः ।**
**मानसमुपैति केयं चित्रगता राजहंसीव ।।2. 9 ।। इति**

तस्याः सौन्दर्यम् आस्वादयति उदयनः ।

नूतनायाः नायिकायाः यानि कुतूहलादीनि लक्षणानि भवन्ति तानि सर्वाण्यपि प्रायशः नायिकायाम् अस्यां दृश्यन्ते ।

**नवानुरागा कन्यात्र नायिका नृपवंशजा ।।**
**सम्प्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः ।**
**देवीपुनर्भवेज्येष्टा प्रगल्भा नृपवंशजा ।।**
**पदे पदे मानवती तद्वशः सङ्गमो द्वयोः । इति**

सागरिकायाः सौन्दर्येण शङ्किता वासवदत्ता मदनोत्सवसन्निवेशात् तां ततः निष्क्रामयति । तथापि –' एतदप्यस्ति मे प्रेक्षितुं कौतूहलं किं यथा तातस्यान्तः पुरे भगवाननङ्गोऽर्च्यते इहापि तथैव किमन्यथेति । तदलक्षिता भूत्वा प्रेक्षिष्ये' । इति विचिन्त्य रहसि स्थित्वा मन्मथपूजाविधिं परिशीलयति । इयं सागरिका चित्रलेखनादि कर्मसु निपुणा । द्वितीयाङ्के राज्ञः उदयनस्य विरहम् असोढा । कदलीगृहे प्रविश्य –' तावदालेख्यसमर्पितं तमभिमतं जनं प्रेक्ष्य यथासमीहितं करिष्यामि' । इति राज्ञः चित्रं लिखति । सुसङ्गता राज्ञः प्रतिरूपमिव विद्यमानं चित्रं नैपुण्यं च अभिनन्दति । काञ्चनमाला वासवदत्ता च तत् चित्रदर्शनेनैव सागरिकाउदयनयोः अनुरागमवगच्छति । इयं सागरिका उत्तमकुलोत्पन्ना । अत एव तस्याः गुणाः अपि तादृशाः एव भवन्ति । 'अवमानात् बर्त्सनादपेक्षया मरणमेव उत्तमम्' इति मत्वा माधवीलतापाशेन आत्महत्यां कर्तुमिच्छति द्वितीयाङ्के । तथैव चतुर्थाङ्केपि अग्निज्वालासु समाकीर्णस्वपि पीडामननुभूय मरणेन दुःखावसानं भवतीति आनन्दं प्राप्नोति । '(हा धिक् समन्ततः प्रज्वलितो हुतवहः ')। इति विचिन्त्य सपरितोषं 'अद्य हुतवहो दिष्ट्या करिष्यति मम दुःखावसानम् ' । इति चिन्तयति ।

**दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।**
**प्रियसखि विषमं प्रेम मरणं शरणं न वरमेकम् ।।2.7 ।।**

इत्येवं चिन्तयत्यपि यदा यदा राजानं पश्यति तदा तदा जीविताभलाषं व्यञ्जयति । माधवीलतापाशेन आत्महत्याप्रयत्नप्रसङ्गे ऐन्द्रजालक प्रयुक्तेन अन्तःपुरदाहे च 'आर्यपुत्रः। तदेतं प्रेक्ष्य पुनरपि मे जीविताभिलाषः संवृत्तः' । इति विचिन्त्य परित्रायतां परित्रायतां इति वक्ति ।

यद्यपि उदयने अनुरक्ता तथापि वासवदत्तायाः विषये अहम् अनुचितं व्यवहरामि इति पश्चात्तापहृदया राजानम् एवं पृच्छति ।

'भर्तः किमेतेनालीकदाक्षिण्येन जीवितादपि वल्लभतराया देव्या आत्मानमपराधिनं करोषि' । एवमेव 'कृतापराधा खल्वहं देव्या न शक्नोमि मुखं दर्शयितुम् '। इति वासवदत्तायाः पुरतः स्वमुखं प्रदर्शयितुं लज्जते । एतेन परदुःखेषु सहनभूतियुक्ता इयं नायिका इति अवगम्यते ।

**औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया**
**तैस्तैर्बन्धुवंधूजनस्य वचनैर्नीताभिमुख्यं पुनः।**
**दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे**
**संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः।। 1.2 ।।** इति

नान्दीश्लोके निर्दिष्टायाः गौर्याः नवोढायाः प्रतिबिम्भरूपा इयं नायिका सागरिका ।

एवं यथा उदयनस्य चारित्रं लोके हारि तद्वत् सागरिकायाः अपि चारित्रं प्रेक्षकानां मनांसि आरञ्जयति ।

## 4.3.3 वासवदत्ता

नाटिकालक्षणमनुश्रुत्य अस्यां रत्नावल्यां द्वे नायके स्तः । तयोः ज्येष्टानायिका वासवदत्ता । प्रगल्भा अनुरागयुक्ता च । इयम् अवन्तिनरेशस्य प्रद्योतस्य पुत्री । यथा इयं सुन्दरी तथा सच्चरित्र पातिव्रत्य क्षमाशीलता दयादि विभिन्नैः गुणैः सम्भूषिता । राज्ञः दाक्षिण्यस्वभावं ज्ञात्वापि स्वाधीनपतिका भवितुमेव इच्छति । अतः राज्ञा सह सुन्दरीणां स्त्रीणां परिचयः यथा न स्यात् तथा नितरां प्रयतते ।

इयं वासवदत्ता यद्यपि सहजाभिजात्यस्वभावेन क्वचित् प्रगल्भेव व्यवहरति । इतरैस्सह सामञ्जस्य सम्पादने सुसफला । उदयनस्य नूतनायां नायिकायाम् अनुरागः लक्षितः ततः आरभ्य सा राजनि निष्ठुरा । परं निष्ठुराभूत्वा पादयोः पतितं स्वभर्तारं अविगनय्य रोषात् ततः निष्क्रामति । परन्तु भर्तुः राज्ञः तथा तिरस्करणम् अनुचितम् इति चिन्तयित्वा पश्चात्तापहृदया राजानं सान्त्वयितुं पुनः राज्ञः सकाशमागच्छति । तदेव एवं कथयति – ' हञ्जे काञ्चनमाले तं तथा चरणनिपतितमार्यपुत्रमवधीर्यागच्छन्त्या मयातिनिष्ठुरं कृतम्। तदिदानीं स्वयमेव गत्वार्यपुत्रमनुनेष्यामि । ' इति सागरिकया अपि एतस्याः वासवदत्तायाः अनुरागः आमोदितः ।

एतस्याः सौन्दर्ये स्वाभावे च राज्ञः अपि महती प्रीतिः अतः 'देवीप्रसादनं मुक्त्वा नान्यमत्रोपायः 'इत्येवं चिन्तयित्वा वासवदत्तायाः आनुकूल्यं सम्पादयितुमेव सर्वदा प्रयतते ।

यद्यपि राज्ञः सागरिकायाम् अनुरागः प्रारम्भे न आमोदितः तथापि सागरिकायाः पाणिग्रहणेन उदयनः चक्रवर्ती भविष्यतीति, तथैव सागरिका स्वात्मीयकन्या इति विज्ञाय उदयनरत्नावल्योः समागमं सा आमोदयति । ' अमात्ययौगन्धरायणेनैतावन्तं खलु कालं दुर्जनीकृतास्मि। येन जानतापि न निवेदितम् '। इत्युक्त्वा सागरिकाउदयनयोः विवाहे स्वाभिमतं प्रकटयति । प्रारम्भे तु उदयनसागरिकयोः अनुरागे विप्रलब्धात्वं खण्डितात्वं प्रदर्शयति । इयं रत्नावली सिंहलेश्वरस्य दुहिता इति ज्ञात्वा स्वानुजात्वम् आह्लादेन अङ्गीकृत्य तयोः पाणिग्रहणं कारयति इति एतस्याः उदारशीलत्वं सौजन्यम् अभिव्यज्यते ।

## 4.3.4 यौगन्धरायणः

रत्नावलीनाटिकायाः नयकः उदयनः । स च दक्षिणः धीरललितश्च । तस्य अयं यौगन्धरायणः योग्यः सचिवः । अत एव सः (राजा) निश्चिन्तः । तथा च वक्ति राजा – 'राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः' इति यौगन्धरायणस्य योग्यत्वं राजा स्वयमङ्गीकरोति । तदायत्तचित्तोऽपि भवति ।

रत्नावली नाटिकायाः इतिवृत्तस्य सर्वस्यापि वस्तुनः सूत्रधारः यौगन्धरायणः एव । अयं विधेः आनुकूल्यमेव सर्वकार्याणां सिद्धौ मुख्यं विधानम् इति अङ्गीकरोति । अत एव –

**द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।**
**आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः** ।।1.6 ।। इति सूत्रधारस्य वचनं यथातथं अङ्गीकरोति । वक्ति च – कः सन्देहः –

**प्रारम्भेऽस्मिन्स्वामिनो वृद्धिहेतौ**
**दैवेनेत्थं दत्तहस्तावलम्बे।**
**सिद्धेर्भ्रान्तिर्नास्ति सत्यं तथापि**
**स्वेच्छाचारी भीत एवास्मि भर्तुः**।। 1.7 ।। इति

स्वव्यूहं सर्वमपि विशदयति । सागरिकायाः प्राप्तिः, तदनु सागरिकां वासवदत्तायाः हस्ते निक्षिप्तिः इत्यादिकं सर्वमपि स्वराज्ञः उदयनस्य चक्रवर्तित्वलाभाय इति प्रकाशयति ।

यद्यपि सर्वं सूत्रं स्वहस्ते एव निक्षिपति तथापि स्वेच्छाचारी भीत एवास्मि इति शङ्कते च । 'देव क्षम्यतां यन्मया देवस्यानिवेद्य कृतम्' इति राजानं क्षमां याचते । राज्ञा पृष्टे सति – 'देव श्रूयताम्। इयं सिंहलेश्वरदुहिता सिद्धेनादिष्टा यथा योऽस्याः पाणिं ग्रहीष्यति स सार्वभौमो राजा भविष्यति। ततस्तत्प्रत्ययादस्माभिः स्वाम्यर्थं बहुशः प्रार्थ्यमानेनापि सिंहलेश्वरेण देव्या वासवदत्तायाश्चित्तखेदं परिहरता यदा न दत्ता '--- 'तदा लावाणकेन वह्निना देवी दग्धेति प्रसिद्धिमुत्पाद्य तदन्तिकं बाभ्रव्यः प्रहितः ' । इति

सागरिका कुतो वा देव्याः हस्ते निक्षिप्ता इत्याद्यपि सर्वमुक्त्वा देव्याः वासवदत्तायाः अनुमोदमपि सम्पादयति ।

सागरिका वासवदत्तया कुत्र बद्धा, निक्षिप्ता इति अज्ञाय ऐन्द्रजालकमपि प्रावेशयति । एवं रूपकेस्मिन् अभिलाषा विप्रलम्भश्रृङ्गारस्य ईर्ष्याविप्रलम्भश्रृङ्गारस्य च तदनु निर्वहणे अद्भुतरसस्य च सङ्कल्पे आस्वादे च मुख्यभूमिकां निर्वहति इति यौगन्धरायणस्य चारित्रम् अस्मिन् रूपके अत्यन्तशुद्धं स्वार्थरहितं निबध्नाति कविः ।

## 4.4 सारांशः

उदयनः धीरललितनायकः, सचिवायत्तसिद्धिश्च प्रभुः । एतल्लक्षणलक्षितस्य नायकस्य तदुचितनायिकादीनां च पात्राणि रूपकस्यास्य औन्नत्यप्रापणे कारकाणि भवन्ति । एतानि पात्राणि सौशील्यादि गुणभूयिष्टानि ।

# सन्दर्भवाक्यानि
# पञ्चमांशः

## संरचना

5.1 प्रस्तावना

5.2 उद्देश्यानि

5.3 सन्दर्भवाक्यानि

5.3.1 आनीय झटिति घटयति विधिरभिमतमभि-
मुखीभूतः ।

5.3.2 कष्टोऽयं खलु भृत्यभावः

5.3.3 न कमलाकरं वर्जयित्वा राजहंस्यन्यत्राभिरमते

5.3.4 अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः

5.3.5 मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः

5.3.6 इयमनभ्रा वृष्टिः

5.3.7 किं पुनः साहसिकानां पुरुषाणां न सम्भाव्यते

5.3.8 घुणाक्षरमपि कदापि सम्भवत्येव ।

5.3.9 मनश्चलं प्रकृत्यैव

5.3.10 प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति

5.3.11 तीव्रः स्मरसन्तापो न तथादौ बाधते यथासन्ने ।
तपति प्रावृषि नितरामभ्यर्णजलागमो दिवसः।।

5.3.12 दुरवगाहा गतिः दैवस्य

## 5.1 प्रस्तावना

भाषायाः श्रवणम्, पठनम्, लेखनम्, भाषणम् इति चत्वारि कौशलानि भवन्ति । एकैकस्य अनेकप्रयोजनानि भवन्ति । परं भाषायाः ज्ञानसमुपार्जनाय चतुर्णां कौशलानां साधनमावश्यकं भवति। तादृश भाषासम्पादननैपुण्यं विशिष्य नाटकपठनेन प्राप्नुवन्ति। अत्र अस्मिन्सन्दर्भे सन्दर्भवाक्यानि केन कदा प्रयुक्तमिति ज्ञायते ।

## 5.2 उद्देश्यानि

- वाक्यपरिचये ग्रन्थस्य नाम, तस्य ग्रन्थस्य रचयितुः नाम, साहित्यशास्त्रे तस्य ग्रन्थस्य योगदानम् इत्येवं रूपेण सामान्यपरिचयः अत्र लभ्यते ।
- वाक्यमिदं केन उक्तम्, कस्मिन् सन्दर्भे प्रयुक्तम् इति छात्रः अवबुध्यते ।
- वाक्यार्थः अत्र वाक्ये विद्यमानस्य प्रत्येकं पदस्य अर्थः अन्वयक्रममनुश्रुत्य लिख्यते ।
- सन्दर्भस्य भावं छात्रः अवगच्छति ।

## 5.3 सन्दर्भवाक्यानि –

### 5.3.1

**आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ।**

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां प्रथमाङ्के दृश्यते । सूत्रधारः नटीमुद्दिश्य एवमब्रवीत् ।

**वाक्यर्थः -**

अनुकूलविधिः यदि भवति अन्यस्मात् देशात्, समुद्रस्य मध्यात्, दिशोप्यन्तात्, नाम चरमभागादपि अभीइष्टं वस्तु आनीय मेलयति इति भावः ।

**वाक्यसन्दर्भः –**

नाटिकारम्भे नटी सोद्वेगं कथयति यत् आर्यपुत्र ! विनापि चिन्तां इदानीमपि भवान् अभिनयं करोति । मन्दभाग्यायाः मम एका एव दुहिता । सापि त्वया कस्मिन्नपि देशान्तरे दत्ता । कथमेवं दूरदेशस्थितेन भर्त्रा सहास्याः पाणिग्रहणं भविष्यतीति चिन्तयामि । न मे अवबुध्यते । तस्मिन् सन्दर्भे सूत्रधारः नटीं (स्वभार्यां) अनुनयन् वाक्यमिदमवोचत् । अनुकूलविधिः यदि भवति अन्यस्मात् देशात्,

समुद्रस्य मध्यात्, दिगवकाशस्य अन्तात्, नाम चरमभागादपि इष्टं वस्तु आनीय मेलयति इति कथयति ।

## 5.3.2 कष्टोऽयं खलु भृत्यभावः

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां प्रथमाङ्के दृश्यते । उदयनस्य अमात्यः यौगन्धरायणः आत्मनि एवं चिन्तयति ।

**वाक्यसन्दर्भः –** जागरूकतया क्रियमाणे सत्यपि यदि अपराधः भवति, कर्ता निन्दितो भवति विशिष्य भृत्यः । यौगन्धरायणः सूत्रधारवचनम् अनुवदन् प्रविशति । सूत्रधारोक्तरीत्या स्वसंकल्पितं कार्यं सेत्स्यति इति आत्मविश्वासेन सह एवं वक्ति । तत्समर्थनाय तेन सङ्कल्पितं राज्ञः चक्रवर्तित्वलाभरूपं कार्यम् एतावताकालेन दैवानुकूलेन सफलप्रायमिति चिन्तयन्नपि भृत्यभावात् क्लेशमनुभवन् एवं वक्ति ।

**वाक्यर्थः –** निष्टया क्रियमाणेऽपि कर्मणि साफल्यसम्भावनायामपि भृत्योऽहमिति भावः कष्टं जनयति ।

## 5.3.3 न कमलाकरं वर्जयित्वा राजहंस्यन्यत्राभिरमते ।

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां द्वितीयाङ्के दृश्यते । सागरिकायाः उदयने अनुरागं परिशील्य सुसङ्गता स्वात्मनि एवं चिन्तयति ।

**वाक्यर्थः –** कमलाकरं (सागरं) परित्यज्य राजहंसी नान्यत्र अभिरमते।

**वाक्यसन्दर्भः –** सागरिकायालिखितम् उदयनस्य चित्रं दृष्ट्वा उदयने अनुरागं परिशील्य, ज्ञात्वा युक्ततां निर्धार्य सागरिकायाः अनुरागं समर्थयन्ती इव तस्मिन् सन्दर्भे एवम् अभिनन्दनपूर्वकं चिन्तयति ।

## 5.3.4 अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां द्वितीयाङ्के दृश्यते । राजा विदूषकं वाक्यमिदं उवाच ।

**वाक्यसन्दर्भः –** नवमल्लिका पुष्पिता न वेति ज्ञातुं प्रेषितः विदूषकः अद्यापि न आगतवान् इति विचिन्तयन्नासन् उदयनः तदानीं विदूषकः आगत्य 'जयतु जयतु प्रियवयस्यः, ही ही भोः आश्चर्यमाश्चर्यम् । साधु रे श्रीखण्डदास धार्मिक साधु । येन दत्तमात्रेणैव तेन दोहदेनेदृशी नवमालिका संवृत्ता येन निरन्तरोद्भिन्नकुसुमगुच्छशोभितविटपा उपहसन्तीव लक्ष्यते देवीपरिगृहीतां माधवीलताम् ।' इति यदा वदति तस्मिन् सन्दर्भे अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः इति उदयनः कथयति ।

**वाक्यभावः –** मणिमन्त्रौषधीनां प्रभावः अमोघः/अनिर्वचनीयः ।

## 5.3.5 मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां प्रथमाङ्के दृश्यते । नाद्यन्ते प्रस्तावनायां सूत्रधारः प्ररोचनाख्यम् आमुखाङ्गम् एवं वक्ति ।

**वाक्यसन्दर्भः –** नाद्यन्ते सूत्रधारः प्रविश्य प्रस्तावना करोति । रत्नावलीरूपकस्य प्रदर्शनं कर्तुं वयमाहूताः इति कथयित्वा सकलसामाजिकानां मनांसि प्रदर्शने अत्र आवर्जितानि इति सहेतुं निरूपयति । यथा -

**श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी**
**लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् ।**
**वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-**
**र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः।।**

इति कविः निपुणः, परिषदपि गुणग्राहिणी, इतिवृत्तमपि लोके सर्वमनोहरम् इत्यादि सर्वैपि गुणाः मद्भाग्यवशात् एकत्र समवेताः इति ।

## 5.3.6 इयमनभ्रा वृष्टिः

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां तृतीयाङ्के दृश्यते । राजा सागरिकामुद्दिश्य उवाच ।

**वाक्यसन्दर्भः** – यदा सागरिका वासवदत्तया परिज्ञातवेषपरिवर्तनवृत्तान्ता माधवी लतापाशेन आत्महत्यां कर्तुमिच्छति । वासवदत्तावेषं धृतवतीं सागरिकां वासवदत्ता इति मत्वा विदूषकः 'भोः वयस्य कथं देवी वासवदत्ता परित्रायस्व परित्रायस्व' इति विदूषकः वक्ति । राजा तां रक्षयित्वा सागरिका इति ज्ञात्वा अचिन्तितरूत्या प्रियायाः सागरिकायाः समागमे राजा एवम् आनन्देन कथयति ।

**वाक्यर्थः –** असम्भावित प्रिया (सागरिका) सङ्गमोऽयं महदानन्दकरः। इयं या आनन्दवृष्टिः सा अनभ्रा ।

## 5.3.7 किं पुनः साहसिकानां पुरुषाणां न सम्भाव्यते

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां तृतीयाङ्के दृश्यते । काञ्चनमाला वासवदत्तामुद्दिश्य एवं कथयति ।

**वाक्यर्थः –** साहसिकानां पुरुषाणां सर्वं सम्भवति ।

**वाक्यसन्दर्भः –** वेषपरिवर्तनेन सागरिका राजानां समागमिष्यतीति सूचनामाधारीकृत्य सागरिकायै प्रतीक्षमाणः उदयनः स्वयमागतां वासवदत्ताम् अङ्गाङ्गसौन्दर्यं वर्णयन् अनङ्गतापविधुराणि मम अङ्गानि निर्वापय इति कथयन् ताम् आलिङ्गितुमाह्वयति । वासवदत्ता अपवार्य स्वखेदं उदयनस्य स्वभावं च काञ्चनमालायै प्रकाशयति । तस्मिन् सन्दर्भे काञ्चनमाला पुरुषाणां साहसिकानां सर्वं सम्भाव्यते इति कथयति ।

### 5.3.8 घुणाक्षरमपि कदापि सम्भवत्येव।

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां द्वितीयाङ्के दृश्यते । काञ्चनमाला वासवदत्तामुद्दिश्य वाक्यमिदं ब्रवीति।

**वाक्यर्थः –** चित्रलेखनं कदाचित् घुणाख्यकीटकविशेषेण कृतेन अक्षरेणापि भवितुमर्हति।

**वाक्यसन्दर्भः –** द्वितीयाङ्के कदलीगृहे सागरिका स्वविरहविनोदार्थम् उदयनस्य चित्रम् उल्लिखति । ज्ञात सागरिकाहृदया सुसङ्गतापि तत्परितः सागरिकायाः चित्रं लिखति। तथा उभयोः (नायिकानायकयोः) अनुरागः प्रकटितः । दुर्दैववशात् वासवदत्तया दृष्टः । वासवदत्तया पृष्टः उदयनः 'इयं कन्यका स्वचेतसैव परकल्पिता न तु दृष्टपूर्वा' इति स्वात्मानं रक्षितुं कथयति। विदूषकश्चापि 'शपे ब्रह्मसूत्रेण' इति समर्थयति । तत्सन्दर्भे तयोः वचनैः प्रभावितायाः काञ्चनमालायाः वचनमिदम्।

### 5.3.9 मनश्चलं प्रकृत्यैव

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां तृतीयाङ्के दृश्यते । राजा उदयनः सागरिका विरहं सोढुमसक्तः स्वात्मनि एवमचिन्तयत्।

**वाक्यभावः -** मनः स्वभावेन चञ्चलम्, लक्षयितुमशक्यञ्च । तथापि अनङ्गेन सर्वैः बाणैः (पञ्चबाणैः) कथं मे मनः तुल्यकालमेव केन प्रकारेण ताडितमिति भावः।

**वाक्यसन्दर्भः –** चित्रफलकवृत्तान्तेन सागरिकाउदयनयोः अनुरागः वासवदत्ताया ज्ञातः इति ज्ञात्वा सागरिका खिन्ना । तदानीं राजा उदयनः सागरिका कथमस्तीति ज्ञातुं मदनिकां प्रेषयति। मदनिकायां चिरयन्त्याम् एकान्ते विरहवेदना अनुभवसन्दर्भे एवं चिन्तयति।

**5.3.10 प्रकृष्टस्य प्रेम्नः स्खलितमविषह्यं हि भवति**

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां प्रथमाङ्के दृश्यते । राजा उदयनः विदूषकं प्रति वाक्यमिदं ब्रवीति ।

**वाक्यर्थः –** उत्कृष्टानुरागे अनुरागस्य स्खलनं सौढुम् असह्यं भवति ।

**वाक्यसन्दर्भः –** चित्रफलकवृत्तान्तेन राज्ञः उदयनस्य व्यवहारेण वासवदत्तायाः शङ्का आविर्बभूव । तदनु वेषपरिवर्तनेन राज्ञः सागरिकायाश्च समागमविचारेण खिन्ना वासवदत्ता । तत्सन्दर्भे राजा स्व अनुस्खालित्यं क्षन्तुं वासवदत्तायाः पादयोः पतति । वासवदत्ता रोषात् ततो यदा निर्गता विदूषकः वयम् अक्षतशरीरो तिष्टावः इत्येव देव्याः प्रसादः इत्युक्ते सति राजा उदयनः एतेन वाक्येन प्रगाढानुरागस्य स्खालित्यम् अविषह्यं भवतीति खेदं प्रकटयति ।

**5.3.11 तीव्रः स्मरसन्तापो न तथादौ बाधते यथासन्ने ।**
**तपति प्रावृषि नितरामभ्यर्णजलागमो दिवसः ।।3.10 ।।**

**अवतारिका –** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां तृतीयाङ्के दृश्यते । राजा उदयनः सागरिका विरहदुःखेन तां प्रतीक्षमानः विदूषकपुरतः वाक्यममुं कथयति ।

**वाक्यर्थः -** स्मरसन्तापः यथा प्रारम्भे तदधिकतया प्रियसमागममासन्ने-सति उत्कण्ठाधिक्यवशात् अधिकं बाधते । यथा वर्षर्तौ समीपागत वृष्टिः दिवसः समयः नितरां तपति तद्वत् प्रियसमागमः अत्यन्तनिकटे सति मदनसनतापः अधिकः भवतीति भावः ।

**वाक्यसन्दर्भः –** वेषपरिवर्तनेन सागरिकायाः समागमः भवतीति ज्ञात्वा उदयनः तां प्रतीक्षते । अयमेव वृत्तान्तः वासवदत्तयापि ज्ञातः। राजानं आर्ध्रापराधिनं ग्रहीतुं स्वयं काञ्चनमालया सह तत्रागच्छति । सागरिकां स्मारं स्मारम् उदयनः एवं स्वसन्तापं व्यञ्जयन् आगतां

वासवदत्तां सागरिका इति मत्वा एवं व्यवहरति , सन्दर्भेस्मिन् राजा वासवदत्तया परिगृहीता।

## 5.3.12 दुरवगाहा गतिः दैवस्य

**अवतारिका** वाक्यमिदं महाकविः श्रीहर्षविरचितायां रत्नावली नाटिकायां चतुर्थाङ्के दृश्यते। राजा वासवदत्तामुद्दिश्य कथयति।

**वाक्यर्थः** – विधेः गमनं साधारणबुद्धिभिः अवगन्तुं न शक्यते । दैवगतिः दुरवगाहा इति यावत्।

**वाक्यसन्दर्भः** – चतुर्थेऽङ्के सिंहलेशं प्रति प्रेषितः बाभ्रव्यः सिंहलदेश अमात्यः वसुभूतिः राजानम् उदयनं मिलितुम् आगच्छन्ति । यौगन्धरायणस्य सूचनानुसारं उदयनः तैस्सह मिलति । राज्ञा उदयनेन सिंहलेश्वरस्य कुशलवार्तां पृष्टः वसुभूतिः दुःखेन अधोमुखः तिष्ठति। राज्ञा पुनः पृष्टे सति सिंहलेश्वरस्य दुहितुः रत्नावल्याः समुद्रे मग्नतादि वार्तां श्रावयति । तदानीं वासवदत्ता हा मन्दभागिनी रत्नावली कुत्र इदानीमसि सखेदं वक्ति। तस्मिन् सन्दर्भे राजा उदयनः देवि समास्वहि समास्वहि दुरवगाहा देवस्य यानभङ्ग पतितोत्थितौ नन्वेतावेव निदर्शनमिति उक्त्वा तथैवरत्नावली अपि जीविता एव भवेदिति आस्वासनं प्रकाशयति।

**SAHITYA (Optional)**

**SASTRI/B.A II YEAR**
**Part II - Paper - IV**

# KIRATARJUNEEYAM

## (Prathamasarga)

**PART - B**

*Directorate of Distance Education*

National Sanskrit University
(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)
Accredited at 'A' level by NAAC
Tirupati - 517 507 (A.P.)

महाकविभारविप्रणीतं

# किरातार्जुनीयम्

----

## प्रथमः सर्गः

'घण्टापथ'-कर्तुर्मङ्गलाचरणम्
अर्धाङ्गीकृतदाम्पत्यमपि गाढानुरागि यत्।
पितृभ्यां जगतस्तस्मै कस्मैचिन्महसे नमः ।।
आलम्बे जगदालम्बं हेरम्बचरणाम्बुजम्।
शुष्यन्ति यद्रजःस्पर्शात् सद्यः प्रत्यूहवार्धयः ।।
तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे।
यत् प्रकासात् प्रलीयन्ते मोहान्धतमसश्छटाः ।।
वाणीं काणभुजीमजीगणदवाशासीच्च वैयासकी-
मन्तस्तत्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत्।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ।।
मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया।
तत्किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ।।
नारिकेलफलसम्मितं वचो भारवेः सपदि तद्विभज्यते।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ।।
नानानिबन्धविषमैकपदैर्नितान्तं साशङ्कचङ्क्रमणखिन्नधियामशङ्कम्।
कर्तुं प्रवेशमिह भारविकाव्यबन्धे घण्टापथं कमपि नूतनमातनिष्ये ।।
इहान्वयमुखेनैव सर्वं व्याख्यायते मया।
नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ।।

अथ तत्रभवान्भारविनामा कविः 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।' इत्याद्यालङ्कारिकवचनप्रामाण्यात् काव्यस्योनेकश्रेयःसाधनताम्, 'काव्या-लापांश्च वर्जयेत्' इति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन् किरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविध्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्याद्यशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन्। कथामुपक्षिपति---

श्रियः कुरूमामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदतिः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ।। १.१ ।।

**अन्वयः**-- कुरुणाम् अधिपस्य श्रियः पालिनीं प्रजासु वृत्तिं वेदितुं यम् अयुङ्क्त वर्णिलिङ्गी स वनेचरः विदितः सन् द्वैतवने युधिष्ठिरं समाययौ। श्रिय इति।। आदितः श्रीशब्दप्रयोगाद्वर्णगणादि-शुद्धिर्नात्रातीवोपयुज्यते। तदुक्तम्---देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा।।' इति। कुरूणा निवासाः कुरवो जनपदाः। 'तस्य निवासः

इत्यण्प्रत्ययः। जनपदे लुप्। तेषामधिपस्य दुर्योधनस्य सम्बन्धिनीम्। शेषे षष्ठी श्रियो राजलक्ष्म्याः। 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी। पाल्यतेऽनयेति पालनी ताम्। प्रतिष्ठापिकामित्यर्थः। प्रजारागमूलत्वात् सम्पद इति भावः। 'करणाधिकरणयोश्च' इति करणे ल्युट्। 'टिड्ढाणञ्-' इत्यादिना ङीप्। प्रजासु जनेषु विषये। 'प्रजा स्यात् सन्ततौ जने' इत्यमरः। वृत्तिं व्यवहारं वेदितुं ज्ञातुं यं वनेचरमयुङ्क्त नियुक्तवान्। वर्णः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी। तदुक्तम्--'स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्। सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च। एतन् मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्। एतदष्टविधमैथुनाभावः प्रशस्तिः। 'वर्णाद्ब्रह्मचारिणि' इतीनिप्रत्ययः। तस्य लिङ्गं चिह्नमस्यास्तीति वर्णिलिङ्गी। ब्रह्मचारिवेषवानित्यर्थः. स नियुक्तः। वने चरतीति वनेचरः किरातः। 'भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः' इत्यमरः 'चरेष्टः' इति टप्रत्ययः। 'तत्पुरुषे कृति बहुलम्' इत्यलुक्। विदितं वेदनमस्यास्तीति विदितः परवृत्तान्तज्ञानवानित्यर्थः। 'अर्शआदिब्योऽच्' इत्यच्प्रत्ययः अथवा कर्तरि कर्मधर्मोपचाराद्विदितवृत्तान्तो विदित इत्युच्यते। उभयत्रापि 'पीता गावः','भुक्ता ब्राह्मणाः', 'विभक्ताः भ्रातरः' इत्यादिवत् साधुत्वम्। न तु कर्तुरि क्तः। सकर्मकेभ्यस्तस्य विधानाभावात्। अतएव भाष्यकारः---'अकारो मत्वर्थीयः।

विभक्तमेषामस्तीति विभक्ताः पीतमेषामस्तीति पीताः' इति सर्वत्र। अथवोत्तरपदलोपोऽत्र द्रष्टव्यः। विभक्तधना विभक्ताः, पीतोदकाः पीता इति। अत्र लोपशब्दार्थमाह कैयटः---'गम्यार्थप्रयोग एव लोपोऽभिमतः।' 'विभक्ता भ्रातर' इत्यत्र च धनस्य यद्विभक्तत्वं तद्भ्रातृषूपचरितम्। 'पीतोदका गावः' 'इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यते' इति। तद्वदत्रापि वृत्तिगतं विदितत्वं वेदितरि वनेचर उपचर्यते। एतेन 'वनाय पीतप्रतिबद्धवत्सां', 'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु' एवमादयो व्याख्याताः। यथा अथवा विदितो विदितवान्। सकर्मकादप्यविवक्षिते कर्मणि क्तः। तथा 'आशितः कर्ता' इत्यादौ। यथाहुः---'दातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया।' इति। द्वैतवने द्वैताख्ये तपोवने। यद्वा द्वे इते गते यस्मात्तद्द्वीतम्। द्वीतमेव द्वैतम्। तच्च तद्वनं च तस्मिन्। शोकमोहादिवर्जित इत्यर्थः। युधि रणे स्थिरं युधिष्ठिर धर्मराजम्। 'हलदन्तात्सप्तम्याः संज्ञायाम्' इत्यलुक्। 'गवियुधिभ्यां स्थिरः' इति षत्वम्। समाययौ सम्प्राप्तः। अत्र 'वने वनेचरः' इति द्वयोः स्वरव्यञ्जनसमुदाययोरेकदैवावृत्त्या वृत्त्यनुप्रासो नामालङ्कारः। अस्मिन्सर्गे वंशस्थवृत्तम्। तल्लक्षणम्---'जतौ तु वंशस्थमुदीरितं जरौ' इति ।।

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ।। १.२ ।।

**अन्वयः**-- कृतप्रमाणस्य सपत्नेन, जितां महीं महीभुजे, निवेदयिष्यतः तस्य मनः न विव्यथे, हि हितषिणः मृषा प्रियं प्रवक्तुं न इच्छन्ति।

कृतप्रणामस्येति।। कृतप्रणामस्य तत्कालोचितत्वात् कृतनमस्कारस्य सपत्नेन रिपुणा दुर्योधनेन। 'रिपौ वेरिसपत्नारिद्विषद्द्वेषणदुर्हृदः' इत्यमरः। जितां स्वायत्तीकृतं महीं महीभुजे युधिष्ठिराय क्रियाग्रहणात् सम्प्रदानत्वम्। विवेदयिष्यतो ज्ञापयिष्यतः। 'लृटः सद्वा' इति शतृप्रत्ययः। तस्य वनेचरस्य मनो न विव्यथे। कथमीदृगप्रियं राज्ञे विज्ञापयामीति मनसि न चचालेत्यर्थः। 'व्यथभयचलनयोः' इति धातोर्लिट्। उक्तमर्थमर्थान्तरन्यासेन समर्थयते--न हीति हि यस्मात्। हितमिच्छन्तीति हितैषिणः स्वामिहितार्थिनः पुरुषा मृषा मिथ्याभूतं प्रियं प्रवक्तुं नेच्छन्ति। अन्यथा

कार्यविघातकतया स्वामिद्रोहिणः स्युरिति भावः। 'अमौढ्यममान्द्यममृषाभाषित्वमभ्यूह- कत्वं चेति चारगुणाः' इति नीतिवाक्यामृते ।।

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ।। १.३ ।।

**अन्वयः-** रहसि सः वनेचरः द्विषां विघाताय विधातुम् इच्छतः भूभृतः अनुज्ञाम् अधिगम्य सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थाम्, इति वाचम् आददे।

द्विषामिति।। सहस्येकान्ते स वनेचरो द्विषां शत्रूणाम्। कर्मणि षष्ठी। विघाताय। निहन्तुमित्यर्थः। 'तुमर्थाच्च भाववचनात्' इति चतुर्थी। 'भाववचनाश्च' इति तुमर्थे घञ्प्रत्ययः। अत्र तादर्थ्यमपिन दोषः। तथापि प्रयोगवैचित्रीविशेषस्याप्यलङ्कारत्वादेवं व्याचक्षते। विधातुं व्यापारं कर्तुमिच्छतः 'समानकर्तृतेषु तुमुन्'। द्विषो विहान्तुमुद्युक्तज्ञानस्येत्यर्थः। अतएव भूभृतो युधिष्ठिरस्यानुज्ञामधिगम्य सुष्ठु भावः सौष्ठवं शब्दसामर्थ्यम्। सुष्ठुशब्दादव्ययादुद्गात्रादित्वादञ्प्रत्ययः। उदारस्य भाव औदार्यमर्थसम्पत्तिः। तयोर्द्वन्द्वः सौष्ठवौदार्ये। अत्रौदार्यशब्दस्याजाद्यदन्तत्वेऽपि 'लक्षणहेत्वोः क्रियायाः' इत्यत्राल्पस्वरस्यापि हेतुशब्दस्य पुर्वनिपातमकुर्वता सूत्रकृतैव पूर्वनिपातस्यानित्यत्वज्ञापनान्न पूर्वनिपातः। उक्तं च काशिकायाम्--'अयमेव लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारचिह्नम्' इति। त एव विशेषः। तयोर्वा विशेषः। तेन शालते शोभत इति सौष्ठवौदार्यविशेषशालिनी ताम्। ताच्छील्ये णिनिः। विनिश्चितार्थां विशेषतः प्रमाणतो निर्णीतार्थामिति वक्ष्यमाणरूपां वाचमाददे स्वीकृतवान्। उवचेत्यर्थः ।।

प्रथमं तावदप्रियनिवेदकमात्मानं प्रत्यक्षोभं याचते---

क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ।। १.४ ।।

**अन्वयः-** हे नृप! क्रियासु युक्तैः अनुजीविभिः चारचक्षुषः प्रभवः न वञ्चनीया अतः असाधु साधु वा क्षन्तुम् अर्हसि। हि हितं मनोहारि च वचः दुर्लभम् (भवति)।

क्रियास्विति।। हे नृप, क्रियासु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिर्भृत्यैः। चारादिभिरित्यर्थः। चरन्तीति चराः। पचाद्यच्। त एव चाराः। चरेः पचाद्यजन्तात्प्रज्ञादित्वादण्प्रत्ययः। त एव चक्षुर्येषां ते चारचक्षुषः। 'स्वपरमण्डले कार्याकार्यावलोकने चाराश्चक्षूंषि क्षितिपतीनाम्' इति नीतिवाक्यामृते। प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीया न प्रतारणीयाः। सत्यमेव वक्तव्या इत्यर्थः। चारापचारे चक्षुरपचारवद्राज्ञां पदे पदे निपात इति भावः। अतोऽप्रतारणत्वाद्धेतोः। असाध्वप्रियं साधु प्रियं वा। मदुक्तमिति शेषः। क्षन्तुं सोढुमर्हसि। कुतः। हितं पथ्यं च मनोहारि प्रियं च वचो दर्लभम्। अतो मद्वचोऽपि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः ।।

तर्हि तूष्णीम्भाव एव वरमित्याशङ्क्याह--

स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ।। १.५ ।।

**अन्वयः-** यः अधिपं साधु न शस्ति सः किंसखा, यः हितात् न, संश्रृणुते सः किंप्रभुः हि नृपेषु अमात्येषु च सदा अनुकूलेषु सर्वसम्पदः रतिं कुर्वते।

स इति।। यः सखामात्यादिरधिपं स्वामिनं साधु हितं न शास्ति नोपदिशति। 'ब्रुवलिसासि--' इत्यादिना शासेर्दुहादिपाठाद्द्विकर्मकत्वम्। स हितानुपदेष्टा। कुत्सितः सखा किं सखा। दुर्मन्त्रीत्यर्थः। 'किमः क्षेपे' इति समासान्तप्रतिषेधः। तथा यः प्रभुर्निग्रहानुग्रहसमर्थः स्वामी हितादाप्तजनाद्धितोपदेष्टुः सकाशात्। 'आख्यातोपयोगे' इत्यपादानत्वात् पञ्चमी। न संश्रृणुते न श्रृणोति। हितमिति शेषः। 'समो गम्यृच्छि--' इत्यादिना मम्पूर्वाच्छृणोतेर- कर्मकादात्मनेपदम्। अकर्मकत्वं वैवक्षिकम्। स हितमश्रोता प्रभुः किंप्रभुः कुत्सितस्वामी। पूर्ववत् समासः। सर्वथा सचिवेन वक्तव्यं श्रोतव्यं स्वामिना। एवं च राजमन्त्रिणोरैकमत्यं स्यादित्यर्थः। ऐकमत्यस्य फलमाह--सदेति। हि यस्मान्नृपेषु स्वामिषु। अमा सह भवा अमात्यास्तेषु च। 'अव्ययात्त्यप्'। अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसम्पदः सदा रतिमनुरागं कुर्वते कुर्वन्ति। न जातु जहातीत्यर्थः। अतो मया वक्तव्यं त्वया च श्रोतव्यमिति भावः। अत्रैवं राजमन्त्रिणोर्हितानुपदेशतदश्रवणनिन्दासामर्थ्यसिद्धेरैकमत्यलक्षणकारणस्य निर्दिष्टस्य सर्वसंप- त्सिद्धिरूपकार्येण समर्थनात् कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। तदुक्तम्-- 'सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः' इति ।।

सम्प्रति स्वाहङ्कारं परिहरति---

निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ।। १.६ ।।

**अन्वयः-** निसर्गदुर्बोधं भूपतीनां चरितं क्व, अबोधविक्लवाः जन्तवः क्व, निगूढतत्त्वं विद्विषां नयवर्त्म यन्मया अवेदि अयं तव अनुभावः।

निसर्गेति।। निसर्गदुर्बोधं स्वभावदुर्ग्रहम्। 'ईषद्दुः--' इत्यादिना खल्प्रत्ययः। भूपतीनां चरितं क्व। अबोधविक्लवा अज्ञानोपहता जन्तवः। मादृशाः पामरजना इत्यर्थः। क्व। नोभयं संघटत इत्यर्थः। तथापि निगूढतत्त्वं संवृतयाथार्थ्यं विद्विषां नयवर्त्म षाड्गुण्यप्रयोगः 'सन्धिविग्रहयानानि संस्थाप्यासनमेव च। द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्।' इत्यादिरूपो यन्मयावेदि। ज्ञातमिति यावत्। विदेः कर्मणि लुङ्। अयम् इदं वेदनमित्यर्थः। विधेयप्राधान्यात् पुंलिङ्गनिर्देशः। तवानुभावः सामर्थ्यम्। अनुगतो भावोऽनुभाव इति घञन्तेन प्रादिसमासः। न तूपसृष्टाद्घञ्प्रत्ययः। 'श्रिणीभुवोऽनुपसर्गे' इत्यनुपसर्गाद्भवते- र्धातोर्घञ्विधानात्। अतएव काशिकायाम्--'कथं प्रभावो राज्ञां प्रकृष्टो भाव इति प्रादिसमासः' इति। दोषपरिहारौ सम्यग्ज्ञात्वैव विज्ञापयामि। न तु वृथा कर्णकठोरं प्रलपामीत्याशयः ।।

सम्प्रति यद्वक्तव्यं तदाह---

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ।। १.७ ।।

**अन्वयः-** सुयोधनः नृपासनस्थः अपि वनाधिवासिनः भवतः पराभवं विशङ्गमानः दुरोदरच्छद्मजितां जगतीं नयेन जेतुं समीहते।

विशङ्कमान इति।। सुखेन युध्यते सुयोधनः। 'भाषायां शासियुधिदृशिघृषिमृषिभ्यो युज्वाच्यः'। नृपासनस्थः सिहासनस्थोऽपि वनमधिवसतीति वनाधिवासिनो वनस्थात्। राज्यभ्रष्टादपीत्यर्थः। भवतस्त्वत्तः पराभवं पराजयं विशङ्कमान उत्प्रेक्षमाणः सन्। दुष्टमुदरमस्येति दुरोदरं द्यूतम्। पृषोदरादित्वात्साधु 'दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम्'

इत्यमरः। तस्य च्छद्मना मिषेण जितां लब्धां दुर्नयार्जितां जगतीं महीम्। 'जगती विष्टपे मह्यां वपास्तुच्छन्दोविशेषयोः' इति वैजयन्ती। नयेन नीत्या जेतुं वशीकर्तु समीहते व्याप्रियते। न तूदास्य इत्यर्थः। बलवत्स्वामिकमविशुद्धागमं च धनं भुञ्जानस्य कुतो मनसः समाधिरिति भावः। अत 'दुरोदरच्छद्मजिताम्' इति विशेषणद्वारेण पदार्थस्य चतुर्थपादार्थं प्रति हेतुत्वेनोपन्यासाद्द्वितीयकाव्यलिङ्गमलङ्कारः। तदुक्तम्---'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्ग-मुदाहृतम्' इति ।।

'नयेन जेतुं जगतीं समीहते' इत्युक्तम्। तत्प्रकारमाह--

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन्भूतिमनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः ।। १.८ ।।

**अन्वयः**- तथापि जिह्मः सः भवज्जिगीषया गुणसम्पदा शुभ्रं यशः तनोति हि भूतिं समुन्नयन्, महात्मभिः समं, विरोधः अपि अनार्यसङ्गमात् वरम्।

तथापीति।। तथापि साशङ्कोऽपि। जिह्मो वक्रः। वञ्चक इति यावत्। स दुर्योधनो भवज्जिगीषया। गुणैर्भवन्तमाक्रमितुमिच्छयेत्यर्थः। 'हेतौ' इति तृतीया। गुणसम्पदा दानदाक्षिण्यादिगुणगरिम्णा करणेन। शुभ्रं यशस्तनोति। स खलो गुणलोभनीयां त्वत्सम्पदमात्मसात्कर्तुं त्वत्तोऽपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः। नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महानस्त्यस्य दोष इत्याशङ्क्य सोऽपि तत्संसर्गालाभे नीचसंगमाद्वरमुत्कर्षावहत्वादित्याह--समिति। तथाहि। भूतिं समुन्नयन्नुत्कर्षमापादयन्। 'लटः शतृशानचौ' इत्यादिना शतृप्रत्ययः। पुनर्लङ्ग्रहणसामर्थ्यात् प्रथमासामानाधिकरण्यम्। महात्मभिः समम्। सहेत्यर्थः। 'साकं सत्रा समं सह' इत्यमरः. अनार्यसङ्गमाद्दुर्जनसंसर्गात्। 'पञ्चमी विभक्ते' इति पञ्चमी। विरोधोऽपि वरं मनाप्रियः 'देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक् प्रिये' इत्यमरः। अत्र मैत्र्यपेक्षया मनाक्प्रियत्वं विरोधस्य 'भूतिं समुन्नयन्' इत्यस्य पूर्ववाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात् समाप्तपुनरात्ताख्यानदोषापत्तिः। तदुक्तं काव्यप्रकाशे--'समाप्तपुनरादानात् समाप्तपुनरात्तकम्' इति। न च वाक्यान्तरमेतत् येनोक्तदोषपरिहारः स्यात्। अर्थान्तरन्यासोऽलङ्कारः स च भूतिसमुन्नयनस्य पदार्थविशेषणद्वारा विरोधवत्त्वं प्रति हेतुत्वाभिधानरूपकाव्यलिङ्गानुप्राणित इति।।

ननु 'कातर्यं केवला नीतिः' इत्याशङ्क्य नीतियुक्तं पौरुषमस्येत्याह---

कृतारिषड्वर्गजयेन मानवीयमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ।। १.९ ।।

**अन्वयः**- कृतारिषड्वर्गजयेन अगम्यरूपां मानवीं, पदवीं प्रपित्सुना अस्ततन्द्रिण तेन नक्तन्दिवं विभज्य नयेन पौरुषं वितन्यते।

कृतेति।। षण्णं वर्गः षड्वर्गः। अरीणामन्तःशत्रूणां कामक्रोधादीनां षड्वर्गोऽरिषड्वर्गः। शिवभागवतवत्समासः। तस्य जयः कृतो येन तेन तथोक्तेन। विनीतेनेत्यर्थः। विनीताधिकारं प्रजापालनमिति भावः। अगम्यरूपां पुरुषमात्रदुष्प्राप्याम्। मनोरिमां मानवीम्। मनूपदिष्टसदाचारक्षुण्णामित्यर्थः। पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रपत्तुमिच्छुना। प्रपद्यतेः सन्नन्तादुप्रत्ययः। 'सनि मीमा--' इत्यादिनेसादेशः। 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः। अस्ता तन्द्रिरालस्यं यस्य तेनास्ततन्द्रिणा। अनलसेनेत्यर्थः। तदिः सौत्रो दातुः। तस्मान् 'वङ्क्र्यादयश्च'

द्रव्यौणादिकः क्रिन्प्रत्ययः। 'कृदिकारादक्तिनो वा ङीष् वक्तव्यः' इति। 'वन्दीघटीतरीतन्द्रीति ङीषन्तोऽपि' इति क्षीरस्वामी। तथा रामायणे प्रयोगः-- 'निस्तन्द्रिरप्रमत्तश्च स्वदोषपरदोषवित्' इति। तेन दुर्योधनेन। पुरुषस्य कर्म पौरुषः पौरुषकारः। उद्योग इति तावत्। युवादित्वादण्प्रत्ययः। 'पौरुषं पुरुषस्योक्ते भावे कर्मणि तेजसि' इति विश्वः। नक्तं च दिवा च नक्तंदिवम्। अहोरात्रयोरित्यर्थः। 'अचतुर-' इत्यादिना सप्तम्यर्थवृत्त्योरव्ययोर्द्वन्द्वनिपातेऽच्समासान्तः। विभज्यास्यां वेलायामिदं कर्मेति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते ।।

सम्प्रति भृत्याद्यनुरागमाह---

सखीनिव प्रीतियुजोऽनुजीविनः समानमानान्सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ।। १.१० ।।

**अन्वयः-** गतस्मयः सः सन्ततं साधु अनुजीविनः प्रीतियुजः सखीन् इव सुहृदश्च बन्धुभिः समानमानान् बन्धुतां कृताधिपत्याम् इव दर्शयते।

सखीनिवेति।। गतस्मयो निरहंकारोऽत एव स दुर्योधनः सन्ततमनारतं साधु सम्यक्। अकपटमित्यर्थः। अनुजीविनो भृत्यान्। प्रीतियुजः स्निग्धान्सखीनिव मित्राणीव। दर्शयते। लोकस्येति शेषः। 'हेतुमति च' इति णिच्। 'णिचश्च' इत्यात्मनेपदम्। शोभनं हृदयं येषां तान्सुहृदो मित्राणि च। 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति निपातः। बन्धुभिर्भ्रात्रादिभिः समानमानांस्तुल्यसत्कारान् दर्शयते। बन्धूनां समूहो बन्धुता ताम्। 'ग्रामजनबन्धुसहायेभ्यस्तल्'। कृतमाधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यमिव दर्शयते। बन्धूनधिपतीनिव दर्शयतीत्यर्थः। भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य तथा तान् सम्भावयतीत्यर्थः। अनुजीव्यादीनाम् 'कर्तुरीप्सिततम् कर्म' इति कर्मत्वम्। पूर्वे त्वस्मिन्नेव पदान्वये वाक्यार्थमित्थं वर्णयन्ति--स राजानुजीव्यादीन् सख्यादीनिव दर्शयते। सख्यादय इव ते तु तं पश्यन्ति। सख्यादिभावेन पश्यतस्तांस्तथा दर्शयते। स्वयमेव च्छन्दानुवर्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः। अर्थात्तस्येप्सितकर्मत्वम्। अणि कर्तुरनुजीव्यादेः 'अभिवादिदृशोरात्मनेपदमुपसंख्यानम्' इति पाक्षिकं कर्मत्वम्। एवं चात्राण्यन्तकर्मणो राज्ञोण्यन्ते कर्तृत्वेऽपि 'आरोहयते हस्ती स्वयमेव' इत्यादिवदश्रूयमाणकर्मान्तरत्वाभावान्नायं णेरणादिसूत्रस्य विषय इति मत्वा 'णिचश्च' इत्यात्मनेपदं प्रतिपेदिरे। भाष्ये तु णेरणादिसूत्रविषयत्वमप्यस्योक्तम्। यथाह--- 'पश्यन्ति भृत्या राजानम्', 'दर्शयते भृत्यान्राजा', 'दर्शयते भृत्यै राजा', अत्रात्मनेपदं सिद्धं भवति' इति। अत्राह कैयटः--'ननु कर्मान्तरसद्भावादत्रात्मनेपदेन भाव्यम्। उच्यते-- अस्मादेवोदाहरणाद्भाष्यकार-स्यायमेवाभिप्रायः ऊह्यते। अण्यन्तावस्थायां ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तर-सद्भावादात्मनेपदं न भवति। यथा--'स्थलमारोहयति मनुष्यान्' इति। इह त्वण्यन्तावस्थायां कर्तॄणां भृत्यानां णौ कर्मत्वमिति भवत्येवात्मनेपदमिति ।।

न चायं त्रिवर्गात् प्रमाद्यतीत्याह---

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान्न बाधतेऽस्य त्रिगणः परस्परम् ।। १.११ ।।

**अन्वयः-** यथायथं विभज्य समपक्षपातया भक्त्या असक्तं आराधयतः अस्य गुणानुरागात् सख्यम् ईयिवान् इव त्रिगणः परस्परं न बाधते।

असक्तमिति।। यथायथं यथास्वं विभज्य। असङ्कीर्णरूपं विविच्येत्यर्थः। 'यथास्वे यथायथम्' इति निपातनाद्द्विर्भावो नपुंसकत्वं च। 'ह्रस्वो नपुंसके पातिपदिकस्य' इति ह्रस्वत्वम्। पक्षे पातः पक्षपात आसक्तिविशेषः समस्तुल्यो यस्यां तया समपक्षपातया। भक्त्यानुरागविशेषेण। पूज्येष्वनुरागो भक्तिरित्युपदेशः। पूज्यश्चायं त्रिवर्ग इति। असक्तमानासक्तम्। अव्यसनितयेति यावत्। आराधयतः सेवमानस्यास्य दुर्योधनस्य त्रयाणां धर्मार्थकामानां गणस्त्रिगणस्त्रिवर्गः। 'त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः' इत्यमरः. गुणानुरागात्तदीयगुणेष्वनुरागात्। गुणवदाश्रयलोभादित्यर्थः। सख्यं मैत्रीम् 'सख्युर्यः' इति यप्रत्यः। ईयिवानुपगतवानिवेत्युत्प्रेक्षा। 'उपेयिवाननाश्वाननूचानश्च' इति क्वसुप्रत्ययान्तो निपातः। 'नात्रोपसर्गस्तन्त्रम्' इति काशिकाकार आह स्म। परस्परं न बाधते। समवर्तित्वादस्य धर्मार्थकामाः परस्परानुपमर्देन वर्धन्त इत्यर्थः। उक्तं च--'धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः' इति ।।

अथ श्लोकत्रयेणोपायकौशलं दर्शयन्नादौ सामदाने दर्सयति---

निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ।। १.१२ ।।

**अन्वयः-** तस्य निरत्ययं साम दानवर्जितं न प्रवर्तते, भूरि दानं सत्क्रियां विरहय्य न प्रवर्तते तस्य विशेषशालिनी सत्क्रिया गुणानुरोधेन विना न प्रवर्तते।

निरत्ययमिति।। तस्य दुर्योधनस्य निरत्ययं निर्बाधम्। अमायिकमित्यर्थः। अन्यथा जनानां दुर्ग्रहत्वादिति भावः। साम सान्त्वम्। 'साम सान्त्वमुभे समे' इत्यमरः। दानवर्जितं न प्रबर्तते। अन्यथा लुब्धाद्यावर्जनस्य शुष्कप्रियैर्वाक्यैर्दुष्करत्वादिति भावः। उक्तं च--'लुब्धमर्थेन गृह्णीयात् साधुमञ्जलिकर्मणा। मूर्खे छन्दानुरोधेन तत्त्वार्थेन च पण्डितम्।।' इति। तथा भूरि प्रभूतम्। न तु कदाचित् स्वल्पमित्यर्थः। दानं धनत्यागः। सदित्यादरार्थेऽव्ययम्। 'आदरानादरयोः सदसती' इति निपातसंज्ञास्मरणात्। तस्य क्रियां सत्क्रियां विरहय्य विहाय। 'ल्यपि लघुपूर्वात्' इत्ययादेशो न प्रवर्तते। अनादरे दानवैफल्यदिति भावः। न चैवं सर्वत्र, येनाविवेकित्वं कोशहानिश्च स्यादित्याह--प्रेति। विशेषशालिन्यतिशययोगिनी सत्क्रियादरक्रिया गुणानुरोधेन गुणानुरागेण विना न प्रवर्तते। 'पृथग्विना-' इत्यादिना तृतीया। गुणेष्वेवादरो भूरिदानं चेति नोक्तदोषावकाश इत्यर्थः। अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनादेकावल्यलङ्कारः। तदुक्तं काव्यप्रकाशे--'स्थाप्यतेऽपिह्यते वापि यथापूर्वं परं परम्। विशेषणतया वस्तु यत्र सैकावली द्विधा।।' इति।।

अथ दण्डप्रकारमाह---

वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ।। १.१३ ।।

**अन्वयः-** वशी सः वसूनि वाञ्छन् न मन्युना न निवृत्तकारणः स्वधर्म इत्येव गुरूपदिष्टेन रिपौ सुते अपि वा दण्डेन धर्मविप्लवं निहन्ति।

वसूनीति।। वशी दुर्योधनो वसूनि धनानि वाञ्छन्न। लोभान्नेत्यर्थः। 'वसुतोये धने मणौ' इति वैजयन्ती। निहन्तीति शेषः। तथा मन्युना कोपेन न च। 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः। 'धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः' इति स्मरणादित्यर्थः। किन्तु निवृत्तकारणो निवृत्तलोभादिनिमित्तः सन् स्वधर्म इत्येव। स्वस्य राज्ञः सतो ममायं धर्मो ममेदं कर्तव्यमित्यस्मादेव

हेतोरित्यर्थः। 'अदण्ड्यान् दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति नरकं चैव गच्छति।।' इति स्मरणादिति भावः। गुरुपदिष्टेन प्राड्विवाकोपदिष्टेन। 'धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः। समाहितमतिः पश्येदव्यवहाराननुक्रमात्।।' इति नारदस्मरणात्। दण्डेन दमेन। शिक्षयेत्यर्थः। रिपौ सुतेऽपि वा। स्थितमिति शेषः। एतेनास्य समदर्शित्वमुक्तम्। धर्मविप्लवं धर्मव्यतिक्रमम्। अधर्ममिति यावत्। निहन्ति निवारयति दुष्ट एवास्य शत्रुः शिष्ट एव बन्धुः। न तु सम्बन्धननिबन्धः पक्षपातोऽस्तीत्यर्थः।।

सम्प्रति भेदकौशलं दर्शयति---

विधाय रक्षान्परितः परेतरानशङ्कितताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ।। १.१४ ।।

**अन्वयः-** शङ्कितः परितः परेतरान् रक्षान् विधाय अशङ्किताकारम् उपैति क्रियापबर्गेषु अनुजीविसात्कृताः सम्पदः अस्य कृतज्ञतां वदन्ति।

विधायेति।। शङ्का सञ्जातास्य शङ्कितोऽविश्वस्तः सन्परितः सर्वत्र स्वपरमण्डले परेतरानात्मीतयान्। अवञ्चकानिति यावत्। यद्वा परानितरयन्ति भेदेनात्मसात्कुर्वन्तीति परेतरान्। तत्करोतीति ण्यन्तात्कर्मण्यण्प्रत्ययः। रक्षन्तीति रक्षान्रक्षकान्। मन्त्रगुप्ति- समर्थानित्यर्थः। 'नन्दिग्रहि--' इत्यादिना पचाद्यच्। विधाय कृत्वा। नियुज्येत्यर्थः। अशङ्किताकारमुपैति। स्वयमविश्वस्तोऽपि विश्वस्तवदेव व्यवहरन् परमुखेनैव परान् भिनत्तीत्यर्तः। न च तारक्षानुपेक्षते येन तेऽपि विकुर्वीरन्नित्याह-क्रियेति। क्रियापवर्गेषु कर्मसमाप्तिष्वनुजीविसात्कृता भृत्याधीनाः कृताः। अपरावर्तितया दत्ता इत्यर्थः। 'देये त्रा च' इति सातिप्रत्ययः। सम्पदोऽस्य राज्ञः कृतज्ञतामुपकारित्वं वदन्ति। प्रीतिदानैरेवास्य कृतज्ञत्वं प्रकाश्यते, न तु वाङ्मात्रेणत्यर्थः। कृतज्ञे राजन्यनुजीविनोऽनुरज्यन्तेऽनुरक्ताश्च तं रक्षन्तीति भावः ।।

अथोपायप्रयोगस्य फलवत्तां दर्शयति---

अनारतं तेन पदेषु लम्भिता विसृज्य सम्यग्विनियोगसत्क्रियाः।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसम्पदः ।। १.१५ ।।

**अन्वयः-** तेन पदेषु सम्यग् विभज्य लम्भिताः विनियोगसत्क्रियाः उपायाः संघर्षम् उपेत्यं इव परिबृंहितायतीः अर्थसम्पदः फलन्ति।

अनारतमिति।। तेन राज्ञा पदेषूपादेयवस्तुषु। 'पद व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। सम्यगसङ्कीर्णमव्यस्तं च विभज्य विविच्य विनियोग एव सत्क्रियानुग्रहः। सत्कार इति यावत्। यासां ता लम्भिताः। स्थानेषु सम्यक्प्रयुक्ता इत्यर्थः। उपायाः सामादयः। संघर्षं परस्परस्पर्धामुपेत्येवेत्युत्प्रेक्षा। परिबृं- हितायातीः प्रचितोत्तरकालाः। स्थिरा इत्यर्थः। अर्थसम्पदोऽनारतमजस्रं फलन्ति। प्रसुवत इत्यर्थः ।।

अर्थसम्पदमेवाह---

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम्।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ।। १.१६ ।।

**अन्वयः-** अयुग्मच्छदगन्धिः नृपोपायनदन्तिनां मदः अनेकराजन्यरथाश्वसंकुलं तदीयम् आस्थाननिकेतनाजिरं भृशम् आर्द्रतां नयति।

अनेकेति।। अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धो यस्यासावयुग्मच्छदगन्धिः। 'सप्तम्युपमान-' इत्यादिना बहुव्रीहिरुत्तरपदलोपश्च। 'उपमानाच्च' इति समासान्त इकारः। नृपाणामुपायनान्युपहारभूता ये दन्तिनस्तेषां मदः। 'उपयानमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः। राज्ञामपत्यानि पुमांसो राजन्याः क्षत्रियाः। 'राजश्वशुराद्यत्' इति यत्प्रत्ययः। राज्ञोऽपत्ये जानिग्राहणादन्। रथाश्चास्वाश्च रथाश्वम्। सेनाङ्गत्वादेकवद्भावः। अनेकेषां राजन्यानां रथाश्वेन संकुलं व्याप्तं तदीयमास्थाननिकेतनाजिरं सभामण्डपाङ्गणं भृशमत्यर्थमार्द्रतां पङ्किलत्वं नयति। एतेन महासमृद्धिरस्योक्ता। अत एवोदात्तालङ्कारः। तथा चालङ्कारसूत्रम्---'समृद्धिमद्वस्तुवर्णनमुदात्तः' इति ।।

सम्प्रति जनपदक्षेमकरत्वमाह---

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति ।। १.१७ ।।

**अन्वयः-** चिराय, तस्मिन् क्षेमं वितन्वति अदेवमातृकाः कुरवः अकृष्टापच्याः इव कृषीबलैः सुखेन लभ्याः सश्यसम्पदः दधतः चकासति।

सुखेनेति।। चिराय तस्मिन्दुर्योधने क्षेमं वितन्वति क्षेमंकरे सति। देवः पर्जन्य एव माता येषां ते देवमातृका वृष्ट्यम्बुजीविनो देशाः। ते न भवन्तीत्यदेवमातृकाः नदीमातृका इत्यर्थः। 'देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः। स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्।।' इत्यमरः। एतेनास्य कुल्यादिपूर्तप्रवर्तकत्वमुक्तम्। कुरूणां निवासाः कुरवो जनपदविशेषाः कृष्टेन पच्यन्त इति कृष्टपच्याः। 'राजसूय--' इतायदिना कर्मकर्तरि क्यप्प्रत्ययान्तो निपातः। तद्विपरीता अकृष्टपच्या इव। कृषिर्येषामस्तीति कृषीबलैः कर्षकैरित्यर्थः। 'रजःकृषि--' आदिना वलच्प्रत्ययः। 'वले' इति दीर्घः। सुखेनाक्लेशेन लभ्या लब्धुं शक्याः सस्यासम्पदो दधतो धारयन्तः। 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः। चकासति। सर्वोत्कर्षेण वर्तन्त इत्यर्थः। 'अदभ्यस्तात्' इति झेरदादेशः। 'जक्षित्यादयः षट्' इत्यभ्यस्त संज्ञा। सम्पन्नजनपदत्वादसन्तापकरत्वाच्च दुःसाद्योऽयमिति भावः ।।

उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ।। १.१८ ।।

**अन्वयः-** उदारकीर्तेः दयावतः प्रशान्तवाधम् अभिरक्षया उदयं दिशतः अस्य गुणै उपस्नुता मेदिनी वसूनि स्वयं प्रदुग्धे।

उदारेति।। उदारकीर्तेर्महायशसः। 'उदारो दातृमहतोः' इत्यमरः। दयावतः परदुःखप्रहाणेच्छोः। अत एव प्रशान्तबाधं प्रशमितोपद्रवं यथा स्यात्तथेति क्रियाविशेषणम्। उदयविशेषणं वा। 'वा दान्तशान्त--' इत्यादिना शमिधातोर्ण्यन्तान्निष्ठान्तो निपातः। अभिरक्षया सर्वतस्त्राणेनोदयं वृद्धिं दिशतः सम्पादयतो वसूपमानस्य कुबेरोपमस्य। 'वसुर्मयूखाग्नि- धनाधिपेषु' इति विश्वः। अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिरुपस्नुता द्राविता मेदिनी वसूनि धनानि। 'वसु तोये धने मणौ' इति वैजयन्ती। स्वयं प्रदुग्धे। अक्लेशेन दुह्यत इत्यर्थः। दुहेः कर्मकर्तरि लट्। 'न दुहस्तनुनमां यक्चिणौ' इति यक्प्रतिषेधः। यथा केनचिद्विदग्धेन नवप्रसूता रक्षिता च गौः स्वयं प्रदुग्धे तद्वदिति भावः। अलङ्कारस्तु-- 'विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः' इति सर्वस्वकारः। अत्र प्रतीयमानया गवा सह प्रकृताङ्ग्या मेदिन्या

भेदेऽभेदलक्षणातिशयोक्तिवशाद्दोह्यत्वेनोक्तिरिति संक्षेपः ।।

वीरभटानुकूल्यमाह---

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः।
नसंहतास्तस्य नभिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ।। १.१९ ।।

**अन्वयः-** महोजसः मानधनाः धनार्चिताः संयति लब्धकीर्तयः न संहता न भिन्नवृत्तयः धनुर्भृतः अस्य असुभिः प्रियाणि वाञ्छन्ति।

महोजस इति।। महोजसो महाबलाः। अन्यथा दुर्बलानामनुपकारित्वादिति भावः. मानः कुलशीलाद्यभिमान एव धनं येषां ते मानधनाः। अन्यथा कदाचिद्वलदर्पाद्विकुर्वीरन्नति भावः. धनार्चिताः धनैरर्चिताः सत्कृताः। अन्यथा दारिद्र्यादेनं जह्युरिति भावः। संयति सङ्ग्रामे लब्धकीर्तयः। बहुयशस इत्यर्थः। अन्यथा कदाचिन्मुह्येयुरिति भावः। संहता मिथः संगताः संवार्थनिष्ठा न भवन्तीति नसंहताः। नञर्थस्य नशब्दस्य सुप्सुपेति समासः. भिन्नवृत्तयो मिथो विरोधात् स्वामिकार्यकरा न भवन्तीति नभिन्नवृत्तयः। पूर्ववत् समासः। अन्यथा स्वामिकार्यविघातकतया स्वमिद्रोहिणः स्युरित्युभयत्रापि तात्परर्यार्थः। धनुर्भृतो धानुष्काः। आयुधीयमात्रोपलक्षणमेतत्। प्राधान्याद्धनुर्ग्रहणम्। तस्य दुर्योधनस्यासुभिः प्राणैः प्रियाणि समीहितुं कर्तुं वाञ्छन्ति। आनृण्यार्थ प्राणान् दातुमिच्छन्ति। अन्यथा दोषस्मरणादिति भावः। अत्र महोजसादिपदार्थानां प्राणदानकर्तव्यतां प्रति विशेषणगत्या हेतुत्वाभिधानात् काव्यलिङ्गमलङ्कारः। लक्षणं तूक्तम्। तथा साभिप्रायविशेषणत्वात् परिकरालङ्कार इति द्वयोस्तिलतण्डुलवद्विभक्ततया स्फुरणात् संसृष्टिः ।।

सम्प्रति स्वराष्ट्रवत् परराष्ट्रवृत्तान्तमपि वेत्तीत्याह---

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ।। १.२० ।।

**अन्वयः-** अशेषितक्रियः सः सच्चरितैः चरैः महीभृतां क्रिया निःशेषं वेद धातुः इव अस्य ईहितं महोदयैः अनुबन्धिभिः फलैः प्रतीयते।

महीभृतामिति।। अशेषितक्रियः समापितकृत्यः। आफलोदयकर्मेत्यर्थः। स दुर्योधनः। सच्चरितैः शुद्धचरितैः। अवञ्चकैरित्यर्थः। चरन्तीति चरास्तैश्चरैः प्रणिधिभिः। पचाद्यच्। महीभृतां क्रियाः प्रारम्भान्निः शेषं वेद वेत्ति। 'विदो लटो वा' इति णलादेशः। स्वरहस्यं तु न कश्चिद्वेदेत्याह---महोदयैरिति। धातुरिवतस्य दुर्योधनस्येहितमुद्योगो महोदयैर्महावृद्धिभिः। हितमनुबध्नन्त्यनुरुन्धन्तीति हितानुबन्धिभिः। स्वन्तैरित्यर्थः। फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते। फलानुमेयास्तस्य प्रारम्भा इत्यर्थः ।।

मित्रबलमाह---

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ।। १.२१ ।।

**अन्वयः-** तेन क्वचित् सज्यं धनुः न उद्यतम् आननं वा कोपविजिह्मं न कृतम्। गुणानुरागेण नराधिपैः अस्य शासनं माल्यम् इव शिरोभिः उह्यते।

नेति।। तेन राज्ञा क्वचित् कुत्रापि। सह ज्यया मौर्व्या सज्यम्। 'मौर्वी ज्या शिञ्चिनी गुणः'

इत्यमरः। 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः। धनुर्नोद्यतं नोर्ध्वीकृतम्। आननं वा कोपविजिह्मं कोपकुटिलं कृतम्। यस्य कोप एव नोदेति कुतस्तस्य युद्धप्रसक्तिरिति भावः। कथं तर्ह्याज्ञां कारयति राज्ञ इत्यत्राह--- गुणेति। गुणेषु दयादाक्षिण्यादिष्वनुरागेण प्रेम्णा। माल्यपक्षे सूत्रानुषङ्गेण। यद्वा सौरभ्यगुणलोभेन। नराधिपैरस्य शासनमाज्ञा। मालैव माल्यं तदिव। 'चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्' इति क्षीरस्वामी। शिरोभिरुह्यते धार्यते। 'वचिस्वपियजादीनां किति' इति यकि सम्प्रसारणम्। अत्रोपमा स्फुटैव।।

सम्प्रत्यस्य धार्मिकत्वमाह---

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ।। १.२२ ।।

**अन्वयः**- इद्धशासनः सः नवयौवनोद्धतं दुःशासनं यौवराज्ये निधाय पुरोधसा अनुमतः अखिन्नः मखेषु हव्येन हिरण्यरेतसं धिनोति ।

स इति।। इद्धशासनोऽप्रतिहताज्ञः स दुर्योधनो नवयौवनेनोद्धतं प्रगल्भम् धुरन्धरमित्यर्थः। दुःखेन शास्यत इति दुःशासनस्तम्। 'भाषायां शासियुधि इत्यादिना खलर्थे युच्प्रत्ययः। पुरोधसा पुरोहितेनानुमतोऽनुज्ञातः। तस्मिन् याजके सतीत्यर्थः। तदुल्लङ्घने दोषस्मरणादिति भावः। 'निष्ठा' इति भूतार्थे क्तः। न तु 'मतिबुद्धि--' इत्यादिना वर्तमानार्थे। अन्यथा 'पुरोधसा' इत्यत्र 'क्तस्य च वर्तमाने' इति षष्ठी स्यात्। अखिलोऽनलसो मखेषु क्रतुषु हव्येन हविषा। हिरण्यं रेतो यस्य तं हिरण्यरेतसमनलं धिनोति प्रीणयति। धिन्वेः प्रीणनार्थात् 'धिन्विकृण्व्योर च' इत्युप्रत्ययः। अकारश्चान्तादेशः ।।

न चैतावता निरुद्योगैर्भाव्यमित्याशङ्क्याशां दर्शयति--

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ।। १.२३ ।।

**अन्वयः**- सः प्रलीनभूपालं स्थिरायति आवारिधि भुवः मण्डलं प्रशासत् अपि त्वत् एष्यती भियः चिन्तयति एव। अहो! बलवद्विरोधिता दुरन्ता।

प्रलीनति।। स दुर्योधनः प्रलीनभूपालम् निःसपत्नमित्यर्थः। स्थिरायति चिरस्थायीत्यर्थः। भुवो मण्डलमावारिधिभ्य आवारिधि। 'आङ्मर्यादाभिविध्यो।' इत्यव्ययीभावः। प्रशासदाज्ञापयन्नपि। 'जक्षित्यादयः षट्' इत्यभ्यस्तसञ्ज्ञा। 'नाभ्यस्ताच्छतु' इति नुमागमप्रतिषेधः। त्वत्त्वत्त एष्यतीरागमिष्यतीः। धातूनामनेकार्थत्वादुक्तार्थसिद्धिः। अथवाङ्पूर्वः पाठः। 'एत्येधत्यूठ्सु' इति वृद्धिः। 'लृटः सद्वा' इति शतृप्रत्ययः। 'उगितश्च' इति ङीप्। 'आच्छीनद्योर्नुम्' इति विकल्पन्नुमभावः। भियो भयहेतून्। विपद इत्यर्थः। चिन्तयत्यालोचयत्येव। स एवाह---अहो बलवद्विरोधिता दुरन्ता दुष्टावसाना। सार्वभौमस्यापि प्रबलैः सह वैरायमाणत्वमनर्थपर्यवसाय्येवेति तात्पर्यम्। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ।।

ननु गूढाकारेङ्गितस्य तस्य भयं त्वया कथं निरधारीत्यत्राह---

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद्व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः ।। १.२४ ।।

**अन्वयः**- कथाप्रसङ्गेन जनैः उदाहृतात् तवाभिधानात् अनुस्मृताखण्डसूनुविक्रमः सः दुःसहात् मन्त्रपदात्

उरगः इव नताननः व्यथते।

कथेति।। कथाप्रसङ्गेन गोष्ठीवचनेन जनै। अन्यत्र कथाप्रसङ्गेन विषवैद्यैन। 'कथाप्रसङ्गो वार्तायां विषवैद्येऽपि वाच्यवत्' इति विश्वः। एकवचनस्यातन्त्रत्वाज्जनविशेषणम्। उदाहृतादुच्चारितात्तवाभिधानान्नामधेयात् स्मारकाद्धेतोः। हेतौ' इति पञ्चमी। 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः। अन्यत्र तवाभिधानात्। 'नामैकदेशग्रहणे नाममात्रग्रहणम्' इति न्यायात्तश्च वश्च तवौ तार्क्ष्यवासुकी तयोरभिधानं यस्मिन्पदे तस्मात्। यद्वा कथाप्रसङ्ग इनाश्च ते जनाश्चेत्येकं पदम्। अनुस्मृताखण्डलसूनुविक्रमः स्मृतार्जुनपराक्रमः सन्दुःसहादतिदुःसहान्मन्त्रपदान्मन्त्रशब्दात् स्मारकाद्धेतोः। आखण्डलसूनुरिन्द्रानुजः। उपेन्द्रो विष्णुरिति यावत्। 'सूनुः' पुत्रेऽनुजे रवौ' इति विश्वः। तस्य विः पक्षी। गरुड इत्यर्थः। तस्य क्रमः पादविशेषः। सेऽनुस्मृतो येन स तथोक्तः, स्मृतगरुडमहिमा। उरग इव। नताननः सन्। व्यथते दुःख्यते। 'पीडा बाधा व्यथा दुःखम्' इत्यमरः। अत्युत्कटभयदोषादिविकारा दुर्वारा इति भावः। 'सर्वतो जयमन्विच्छेत् पुत्रादिच्छेत् पराजयम्' इति न्ययादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति सर्वमवदातम् ।।

निगमयति--

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम्।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ।। १.२५ ।।

**अन्वयः**- तत् त्वयि जिह्मं कर्तुम् उद्यते तत्र विधेयम् उत्तरं त्वया आशु, विधीयतां परप्रणीतानि वचांसि चिन्वतां मादृशां गिरः प्रवृत्तिसाराः खलु।

तदिति।। तत्तस्मात्त्वयि जिह्मं कपटं कर्तुमुद्यते। त्वां जिघांसावित्यर्थः। तत्र तस्मिन् दुर्योधने विधेयं कर्तव्यमुत्तरं प्रतिक्रियाशु विधीयतां क्रियताम्। ननु कर्तव्यमपि त्वयैवोच्यतामिति चेत्तत्राह--परेति। परप्रणीतानि परोक्तानि वचांसि चिन्वतां गवेषयतां मादृशाम्। वार्ताहारिणामित्यर्थः। गिरः प्रवृत्तिसारा वार्तामात्रसाराः खलु। 'वार्ता प्रवृत्तिर्वृत्तान्तः' इत्यमरः। वार्त्तामात्रवादिनो वयम्, न तु कर्तव्यार्थोपदेशसमर्थाः। अतस्त्वयैव निर्धार्य कार्यमिति भावः। सामान्येन विशेषसमर्थनादर्थान्तरन्यासः ।।

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसन्निवासिनाम्।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ।। १.२६ ।।

**अन्वयः**- वनसन्निवासिनां पत्यौ इति गिरम् ईरयित्वा आत्तसत्क्रिये गते सति महीभुजा कृष्णासदनं प्रविश्य तद्वचः अनुजसन्निधौ आचचक्षे।

इतीती।। वनसन्निवासिनां पत्यौ वनेचराधिप इति गिरमीरयित्वोक्त्वात्तसत्क्रिये गृहीतपारितोषिके गते सति। 'तुष्टिदानमेव चाराणां हि वेतनम्। ते हि तल्लोभात् स्वामिकार्योष्वतीव त्वरयन्ते' इति नीतिवाक्यामृते। अथ महीभुजा राज्ञा कृष्णासदनं द्रौपदीभवनं प्रविश्यानुजसन्निधौ तद्वनेचरोक्तं वचो वाक्यमाचचक्ष आख्यातम्। अथवा कृष्णेति पदच्छेदः। सदनं प्रविश्यानुजसन्निधौ तद्वचः कृष्णाचचक्ष आख्याता। अक्षिङो दुहादेर्द्विकर्मकत्वादप्रधाने कर्मणि लिट् ।।

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा।

नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ।। १.२७ ।।

**अन्वयः-** अथ द्रुपदात्मजा द्विषतां सिद्धिं निशम्य ततस्त्या अपाकृतीः विनियन्तुम् अक्षमा नृपस्य मन्युव्यवसायदीपिनीः गिरः उदाजहार।

निशम्येति।। अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं वृद्धिरूपां निशम्य। ततस्तदनन्तरम्। ततो द्विषद्भ्य आगतास्ततस्त्याः। 'अव्ययात्त्यप्' इति त्यप्। अपाकृतीर्विकारानिनियन्तुं निरोद्धुमक्षमा सती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः क्रोधोद्योगयोर्दीपिनीः संवर्धिनीर्गिरो वाक्यान्युदाजहार। जगादेत्यर्थः ।।

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ।। १.२८ ।।

**अन्वयः-** भवादृक्षेषु प्रमदाजनोदितम् अनुशासनम् अधिक्षेप इव भवति, तथापि निरस्तनारीसमया दुराधयः मां वक्तुं व्यवसाययन्ति।

भवादृशेष्विति।। भवादृशा भवद्विधाः। पण्डिता इत्यर्थः। तेषु विषये। 'त्यदादिषु--' इत्यादिना कञ्। 'आ सर्वनाम्नः' इत्याकारादेशः। प्रमदाजनोदितं स्त्रीजनोक्तम्। वदेः क्तः। 'वचिस्वपि--' इत्यादिना सम्प्रसारणम्। अनुशासनं नियोगवचनमधिक्षेपस्तिरस्कार इव भवति। अतो न युक्तं वक्तुमित्यर्थः। तथापि वक्तुमनुचितत्वेऽपि निरस्तनारीसमयास्त्याजितशालीनता-रूपस्त्रीसमाचाराः। 'समया शपथाचारकालसिद्धान्तसंविदः' इत्यमरः। दुराधयः समयोल्ल-ङ्घनहेतुत्वाद्दुष्टा मनोव्यथाः। 'पुंस्याधिर्मानसी व्यथा' इत्यमरः। मां वक्तुं व्यवसाययन्ति प्रेरयन्ति। न किंचिदयुक्तं दुःखिनामिति भावः ।।

अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः।
त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ।। १.२९ ।।

**अन्वयः-** आखण्डलतुल्यधामभिः स्ववंशजैः भूपतिभिः चिरं धृता मही-मदच्युता मतङ्गजेन स्रक् इव त्वया आत्महस्तेन अपवर्जिता।

अखण्डमिति।। आखण्डलतुल्यधामभिरिन्द्रतुल्यप्रभावैः। स्ववंशजैः भूपतिभिर्भरतादिभिश्चिरम-खण्डमविच्छिन्नं धृता मही त्वया। मदं च्योततीति मदच्युत् क्विप्। तेन मदस्राविणा मतङ्गजेन स्रगिवात्महस्तेन स्वकरेण। स्वचापलेनेत्यर्थः। अपवर्जिता परिहृता त्यक्ता। स्वदोषादेवायमनर्थागमः इत्यर्थः ।।

स्वदोषादेवायमनर्थागम इत्युक्तम्। स च दोषः कुटिलेष्वकौटिल्यमेवेत्याह--

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ।। १.३० ।।

**अन्वयः-** मूढधियः ते पराभवं व्रजन्ति ये मायाविषु मायिनः न, भवन्ति हि शठाः तथाविधान् असंवृत्ताङ्गान् निशिता इषवः इव प्रविश्य घ्नन्ति।

व्रजन्तीति।। मूढधियो निर्विवेकबुद्धयस्ते पराभवं व्रजन्ति ये मायाविषु मायावत्सु विषये। 'अस्मायामेधा-' इत्यादिना विनिप्रत्ययः। मायिनो मायावन्तः। ब्रीह्यादित्वादिनिप्रत्ययः। न भवन्ति। अत्रैवार्थान्तरं न्यस्यति--प्रविश्येति। शठा अपकारिणो धूर्तास्तथाविधान-कुटिलानसंवृताङ्गानवर्मितशरीरान्निशिता। इषब इव प्रविश्य प्रवेशं कृत्वात्मीया भूत्वा घ्नन्ति हि।

'आर्जवं हि कुटिलेषु न नीतिः' इति भावः ।।

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ।। १.३१ ।।

**अन्वयः-** अनुकूलसाधनः कुलाभिमानी त्वदन्यः कः इव नराधिपः गुणानुरक्तां मनोरमाम् आत्मवधूम् इव श्रियं परैः अपहारयेत्।

गुणेति।। अनुरक्तसाधनोऽनुकूलसहायवान्। उक्तं च कामन्दकीये--'उद्योगादनिवृत्तस्य सुसहायस्य धीमतः। छायेवानुगता तस्य नित्यं श्रीः सहचारिणी।।' इति। कुलाभिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वदन्यस्त्वत्तोऽन्यः। 'अन्यारात्--' इत्यादिना पञ्चमी। क इव नराधिपो गुणैः सन्ध्यादिभिः सौन्दर्यादिभिश्चानुरक्तामनुरागिणीं कुलजां कुलक्रमादागतां कुलीनां च मनोरमां श्रियमात्मवधूमिव स्वभार्यामिव। 'स्वयमेवापहारं कारयेदित्यर्थः। कलत्रापहारवल्लक्ष्म्यापहारोऽपि राज्ञा मानहानिकरत्वादनुपेक्षणीय इति भावः।।

अथ दशभिः कोपोद्दीपनं करोति--

भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ।। १.३२ ।।

**अन्वयः-** हे नरदेव! एतर्हि मनस्विगर्हिते वर्त्मनि विवर्तमानं भवन्तम् उदीरितः मन्यु शुष्कं शमीतरुम् उच्छिखः इव कथं न ज्वलयति।

भवन्तमिति।।---हे नरदेव! नरेन्द्र, एतर्हीदानीम्। अस्मिन्नापत्कालेऽपीत्यर्थः। 'एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा' इत्यमरः। 'इदमोर्हिल्' इति हिल्प्रत्ययः। 'एतेतौ रथोः' इत्येतादेशः। आपदमेवाह--मनस्विगर्हिते शूरजनजुगुप्सिते वर्त्मनि मार्गे विवर्तमानम्। शत्रुकृतां दुर्दशामनुभवन्तमित्यर्थः। भवन्तं त्वामुदीरित उद्धीपितो मन्युः क्रोधः। शुष्कः नीरसम्। 'शुषः कः' इति निष्ठातकारस्य ककारः। शमी चासौ तरुश्चेति विशेषणसमासः। तम्। शमीग्रहणं शीघ्रज्वलनस्वभावात् कृतम्। उच्छिख उद्गतज्वालः। 'घृणिज्वाले अपि शिखे' इत्यमरः। वह्निरिव। कथं न ज्वलयति। ज्वलयितुमुचितमित्यर्थः। 'मितां ह्रस्वः' इति ह्रस्वः ।।

नन्वन्तः शत्रुत्वादयं क्रोधस्त्याज्य एवेत्याशङ्क्याह--

अवन्ध्यकोपस्य विहन्तुरापदं भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना, न जातहार्देन न विद्विषादरः ।। १.३३ ।।

**अन्वयः-** अवन्ध्यकोपस्य आपदां विहन्तु देहिनः स्वयमेव वश्याः भवन्ति अमर्षशून्येन विद्विषा सता जनस्य दरः न जातहार्देन जन्तुना सता जनस्य आदरः न भवति।

अवन्ध्येति।। अवन्ध्यः कोपो यस्य तस्य अवन्ध्यकोपस्यात् एवापदां विहन्तुः। निग्रहानुग्रहसमर्थस्येत्यर्थः। पुंस इति शेषः देहिनो जन्तवः स्वयमेव वश्या वशङ्गता भवन्ति। 'वशं गतः' इति यत्प्रत्ययः। अतस्त्वया कोपिना भवितव्यमित्यर्थः। व्यतिरेके त्वनिष्टमाचष्टे--अमर्षशून्येन निःकोपेन जन्तुना कन्यया शोक इतिवत् 'हेतौ' इति तृतीया। हृदयस्य कर्म हार्दं स्नेहः। 'प्रेमा ना पियता हार्दं प्रेम स्नेहः' इत्यमरः। युवादित्वादण्। 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृदादेशः। जातहार्देन जातस्नेहेन सता जनस्यादरो न। विद्विषा च सतादरो न। अमर्षहीनस्य रागद्वेषावकिञ्चित्करत्वादगण्यावित्यर्थः। अथवा विद्विषा सता दरो भयं

न। 'दरोऽस्त्रिया भये श्वभ्रे' इत्यमरः। एतस्मिन्नेव प्रयोगे संधिवशाद् द्विधा पदच्छेदः। पुंवाख्येषु न दोषः। अतः स्थाने कोपः कार्यस्त्याज्यस्त्वस्थाने कोप इति भावः ।।

परिभ्रमंल्लोहितचन्दनोचितः पदातिरन्तर्गिगिरिरेणुरूषितः।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ।। १.३४ ।।

**अन्वयः-** (प्राक्) लोहितचन्दनोचितः महारथः (अधुना) रेणुरूषितः पदातिः अन्तर्गिरि परिभ्रमन् अयं वृकोदरः सत्यधनस्य मानसं न दुनोति कच्चित्।

परिभ्रमन्निति।। लोहितचन्दनोचित उचितलोहितचन्दनः। 'वाहिताग्न्यादिषु' इति साधुः। अभ्यस्तरक्तचन्दन इत्यर्थः। 'अभ्यस्तेऽप्युचितं न्याय्यम्' इति यादवः। महारथो रथचारी। उभयत्रापि प्रागिति शेषः। अद्य तु रेणुरूषितो धूलिच्छुरितः पादाभ्यामतति गच्छतीति प्रागिति शेषः। अद्य तु रेणुरुषितो धूलिच्छुरितः पादाभ्यामतति गच्छतीति पदातिः पादचारीः।' अज्यतिभ्यां च' इत्यनुवृत्तौ 'पादे च' इत्यौणादिक इन्प्रत्ययः। 'पादस्य पदाज्यातिगोपहतेषु' इति पदादेशः। अन्तर्गिरि गिरिष्वन्त। विभक्त्यर्थेऽव्ययीभावः। 'गिरेश्च सेनकस्य' इति विकल्पात् समासान्ताभावः। पभ्रिमन्नयं वृकोदरो भीमः। सत्यधनस्येति सोल्लुण्ठनवचनम्। अद्यापि सत्यमेव रक्ष्यते, न तु भ्रातर इति भावः। तवेति शेषः। मानसं नो दुनोति कच्चिन्न परितापयति। 'कच्चित्कामप्रवेदने' इत्यमरः। स्वाभिप्रायाविष्करणं कामप्रवेदनम् ।।

विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः ।। १.३५ ।।

**अन्वयः-** वासवोपमः यः छनञ्जयः उत्तरान् कुरून् विजित्य अकुप्यं प्राज्यं वसु (भवते) अयच्छत् सः अधुना तव वल्कवासांसि हरन् कथं न तव मन्युं करोति।

विजित्येति।। वासव इन्द्र उपमा उपमानं यस्य स वासवोपम इन्द्रतुल्यो यो छनञ्जयः। उत्तरान्कुरून्मेरोरुत्तरान्मानुषान्देशविशेषान्विजित्य प्राज्यं प्रभूतम्। 'प्रभूतं प्रचुरं प्राज्यम्' इत्यमरः। कुप्यादन्यदकुप्यं हेमरूप्यात्मकम्। 'स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते। ताभ्यां तदन्यत्तत्कुप्यम्' इत्यमरः। वसु धनमयच्छद्दत्तवान्। 'पाघ्रा-' इत्यादिना दाणो यच्छादेशः। स धनं जयतीति छनञ्जयोऽर्जुनः। 'संज्ञायां भृतृवृजि-' इत्यादिना खच्प्रत्ययः। 'अरुर्द्विषत्--' इत्यादिना मुमागमः। अधुनास्मिन्काले। 'अधुना' इति निपातनात् साधुः। तव वल्कवासांस्याहरन् कथं तव मन्युं क्रोधं दुःखं न करोति।।

वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ।। १.३६ ।।

**अन्वयः-** वनान्तशय्याकठिनीकृताकृती विष्वक् कचाचितौ अगजौ गजौ इव एतौ यमौ विलोकयन् त्वं धृतिसंयमौ बाधितुं कथं न उत्सहसे।

वनान्तेति।। वनान्तो वनमिरेव शय्या तथा कठिनीकृताकृती कठि नीकृतदेहो। 'आकारो देह आकृतिः' इति वैजयन्ती। विष्वक्समन्तात्। 'समन्ततस्तु परितः सर्वतो विष्वगित्यपि' इत्यमरः। कचाचितौ कचव्याप्तौ। विशीर्णकेशावित्यर्थः। अतएवागजौ गिरिसम्भवौ गजाविव स्थितावेतौ यमो युग्मजातौ। माद्रीपुत्रावित्यर्थः। 'यमौ दण्डधरे ध्वाङ्क्षे संयमे यमजेऽपि च' इति विश्वः। विलोकयंस्त्वं कथं धृतिसंयमौ सन्तोषनियमौ। 'धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु' इति विश्वः।

बाधितुं नोत्सहसे न प्रवर्तसे। 'शकधृष--' इत्यादिना तुमुन्। अहो ते महद्धैर्यमिति भावः।।

अथ राज्ञो दुर्दशां दर्शयितुमुपोद्धातमाह। प्रकृतार्थं वर्णयितुमर्थान्तरवर्णनमुपोद्धातः---

इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ।। १.३७ ।।

**अन्वयः-** इमां तावकीं धियम् अहं न वेद। हि धियः विचित्ररूपाः किल। परां भवदापदं वलिलोकयन्त्याः मम चेतः आधयः प्रसभ रुजन्ति।

इमामिति।। इमां वर्तमानाम्। तवेमां तावकीं त्वदीयाम्। 'तस्येदम्' इत्यणप्रत्ययः. 'तवकममकावेकवचने' इति तवकादेशः। धियं त्वादापद्विषयां चित्तवृत्तिमहं न वेद कीदृशी वा न वेद्मि। परबुद्धेरप्रत्यक्षत्वादिति भावः। 'विदो लटो वा' इति लटो ण्लादेशः। न चात्मदृष्टान्तेनापन्नत्वाद्‌दुःखित्वमनुमातुं शक्यते। धीरादिष्वनैकान्तिकत्वादित्याशयेनाह। चित्तवृत्तयो विचित्ररूपा धीराधीरद्यनेकप्रकाराः खलु। किन्तु परामुत्कृष्टां भवदापदं विचिन्तयन्त्या भावयन्त्या मम चेतस्चित्तम्। आधयो मनोव्यथाः। 'उपसर्गे घोः किः' इति किप्रत्ययः। प्रसभं प्रसह्य रुजन्ति भञ्जन्ति। 'रुजो भङ्गे' इति धातोर्लट्। पश्यतामपि दुःसहा दुःखजननी त्वद्विपत्तिरनुभवितारं त्वां न विकरोतीति महच्चित्रमित्यर्थः। चेत इति 'रुजार्थानां भाववचनानामज्वरेः' इति षष्ठी न भवति। तत्र शेषाधिकाराच्छेषत्वस्य विविक्षितत्वादिति ।।

तदापदमेव श्लोकत्रयेणाह--

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ।। १.३८ ।।

**अन्वयः-** यः महाधनं शयनम् अधिरूढः स्तुतिगीतिमङ्गलैः पुरा विबोध्यसे सः अदभ्रदर्भा स्थलीम् अधिशय्य अशिवैः शिवारुतैः विबोध्यसे।

पुरेति।। यस्त्वं महाधनं बहुमूल्यं श्रेष्ठम्। 'महाधनं महामूल्ये' इति विश्वः। शयनं शय्यामधिरूढः सन्। स्तुतयो गीतयश्च ता एव मङ्गलानि तैः करणभूतैः पुरा विबोध्यसे। वैतालिकैरिति शेषः। पूर्वं बोधित इत्यर्थः। 'पुरिलुङ् चास्मै' इति भूतार्थे लट्। स त्वमदभ्रदर्भां बहुकुशाम्। 'अस्त्री कुशं कुथो दर्भः' इति। 'अदभ्रं बहुलं बहु' इति चामरः। स्थलीमकृत्रिमभूमिम्। 'जानदप-' इत्यादिना कृत्रिमार्थे ङीष्। एतेन दुःसहस्पर्शत्वमुक्तम्। 'अधिशीङ्स्थासां कर्म' इति कर्मत्वम्। अधिशय्य शयित्वा। 'अथङ्यि क्ङिति' इत्ययङादेशः। अशिवैरमङ्गलैः शिवारुतैः क्रोष्टुवासितैः। 'शिवा हरीतकी क्रोष्ट्री शमी नद्यामलक्युभे' इति वैजयन्ती। निद्रां जहासि। अद्येति शेषः ।।

पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं परेति कार्श्यं यशसा समं वपुः ।। १.३९ ।।

**अन्वयः-** हे नृप! यत् एतत् वपुः पुरा द्विजातिशेषेण अन्धसा रामणीयकं उपनीतम् अद्य वन्यफलाशिनः ते तत् यशसा समं परं कार्श्यम् परैति ।

पुरेति।। हे नृप! यदेतत्पुरोवर्ति वपुः पुरा द्विजातिशेषेण द्विजभुक्तावशिष्टेनान्धसान्नेन। 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इत्यमरः। रमणीयस्य भावो रामणीयकं मनोहरत्वमुपनीतं प्रापितम्। नयतेर्द्विकर्मकत्वात्प्रधानो कर्मणि क्तः। 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' इति वचनात्।

अद्य वन्यफलाशिनस्ते तव तद्वपुर्यशसा समं परमतिमात्रं कार्श्यं परैति प्राप्नोति। उभयमपि क्षीयत इत्यर्थः। अत्र सहोक्तिरलङ्कारः। तदुक्तं काव्यप्रकाशे---'सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्' इति ।।

अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजं रजः।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ।। १.४० ।।

**अन्वयः**- अनारतं मणिपीठशायिनौ यौ ते चरणौ राजशिरःस्रजां रजः अरञ्जयत् तौ ते चरणौ मृगद्विजालूनशिखेषु बर्हिषां वनेषु निषीदतः।

अनारतमिति।। अनारतमजस्रं मणिपीठशायिनौ मणिमयपादपीठस्थायिनौ यौ चरणौ राजशिरःस्रजां नमद्भूपालमौलिस्रजां रज परागोऽञ्जयत् तौ ते चरणौ, मृगैर्द्विजैश्च तपस्विभिरालूनशिखेषु च्छिन्नाग्रेषु बर्हिषां कुशानाम्। 'बर्हिः कुशहुताशयोः' इति विश्वः। वनेषु निषीदतस्तिष्ठतः ।।

ननु सर्वप्राणिसाधारण्यामापदि का परिदेवनेत्यत्राह--

द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ।। १.४१ ।।

**अन्वयः**---यत् इयं दशा द्विषन्निमित्ता ततः मे मनः समूलम् उन्मूलयति इव परैः अपर्य्यासितवीर्यसम्पदां मानिनां पराभवः अपि उत्सवः एव।

द्विषदिति।। यद्यतः कारणादियं दशावस्था। 'दशा वर्त्तावस्थायाम्' इति विश्वः। द्विषन्तो निमित्तं यस्याः सा। 'द्विषोऽमित्रे' इति शतृप्रत्ययः। अतो मे मनः समूलं साशयमुन्मूलयतीवोत्पाटयतीव। दैविकी त्वापन्न दुःखायेत्याह---परैरिति। परैः शत्रुभिरपर्यासितापर्यावर्तिता वीर्यसम्पद्येषां तेषां मानिनां पराभवो विपदप्युत्सव एवेति वैधर्म्येणार्थान्तरन्यासः। मानहानिर्दुःसहा न त्वापदिति भावः ।।

विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ।। १.४२ ।।

**अन्वयः**- हे नृप! शान्ति विहाय तत् धाम विद्विषां वधाय पुनः सन्धेहि। प्रसीद निस्पृहाः मुनयः शत्रून् अवधूय शमेन सिद्धिं व्रजन्ति भूभृतः न।

विहायेति।। हे नृप, शन्तिं विहाय तत्प्रसिद्धं धाम तेजो विद्विषां वधाय पुनः सन्धेह्यङ्गीकुर। प्रसीद। प्रार्थनायां लोट्। ननु शमेन कार्यसिद्धौ किं क्रोधेनेत्यत्राह--- व्रजन्तीति। निःस्पृहा मुनयः। शत्रूनवधूय निर्जित्य शमेन क्रोधवर्जनेन सिद्धिं व्रजन्ति। भूभृतस्तु न कैवल्यकार्यवद्राजकार्यं न शान्तिसाध्यमित्यर्थः।।

पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम्।
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ।। १.४३ ।।

**अन्वयः**- धामवतां पुरःसरा भवादृशाः यशोधनाः ईदृशं सुदुःसहं निकारं प्राप्य रतिम् अधिकुर्वते चेत् हन्त मनस्विता निराश्रया हता।

पुर इति।। किं च धामवतां तेजस्विनाम्। परनिकारासहिष्णूनामित्यर्थः। पुरः सरन्तीति

पुरःसरा अग्रेशराः। 'पुरोऽग्रतोऽग्रेषु सर्तेः' इति टप्रत्ययः। यशोधना भवादृशाः सुदुसहमतिदुःसहमीदृशमुक्तप्रकारं निकारं पराभवं प्राप्य रतिं सन्तोषमधिकुर्वते स्वीकुर्वते चेत्तर्हि। हन्त इति खेदे। मनस्विताभिमानिता निराश्रया सती हता। तेजस्विजनैक- शरणत्वान्मनस्विताया इत्यर्थः। अतः पराक्रमितव्यमिति भावः। यद्यप्यत्र प्रसहनस्यासङ्गतेरधिपूर्वात् करोतेः 'अधेः प्रसहने' इत्यात्मनेपद न भवति 'प्रसहनं परिभवः' इति काशिका। तथाप्यस्याकर्त्रभिप्रायविवक्षायामेव प्रयोजकत्वात् कर्त्रभिप्राये 'स्वरितञितः--' इत्यात्मनेपदं प्रसिद्धम्।।

अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्मकार्मुकं जटाधरः सञ्जुहुधीह पावकम् ।। १.४४ ।।

**अन्वयः-** अथ निरस्तविक्रमः चिराय क्षमाम् एव सुखस्य साधनं पर्येषि तर्हि लक्ष्मीपतिलक्ष्म कार्मुकं विहाय जटाधरः इह पावकं सञ्जुहुधि।

अथेति।। अथ पक्षान्तरे। निरस्तविक्रमः सन्। चिराय चिरकालेनापि क्षमां क्षान्तिमेव। 'क्षितिक्षान्त्योः क्षमा' इत्यमरः। सुखस्य साधनं पर्येष्यवगच्छसि तर्हि लक्ष्मीपतिलक्ष्म राजचिह्नं कार्मुकं विहाय। धरतीति धरः। पचाद्यच्। जटानां धरो जटाधरः सन्निह वने पावकं जुहुधि। पावके होमं कुर्वित्यर्थः। अधिकरणे कर्मत्वोपचारः। विरक्तस्य किं धनुषेत्यर्थः। 'हुझल्भ्यो हेर्धिः'।।

अथ समयोल्लङ्घनाद्बिभेषि तदपि न किंचिदित्याह--

न समयपरिरक्षणं क्षमं ते निकृतिरेषु परेषु भूरिधाम्नः।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि ।। १.४५ ।।

**अन्वयः-** परेषु निकृतिपरेषु भूरिधाम्नः ते समयपरिरक्षणं न क्षमम्। हि अरिषु विजयार्थिनः क्षितीशाः सोपधि सन्धिदूषणानि विदधति।

नेति।। परेषु शत्रुषु। निकृतिः परं प्रधानं येषु तेषु तथोक्तेष्वपकारतत्परेषु सत्सु भूरिधाम्नो महौजसः प्रतिकारक्षमस्य ते तव समयस्त्रयोदशसंवत्सरान्वने वत्स्यामीत्येवरूपा संवित्। 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः। तस्य परिरक्षण प्रतीक्षणं न क्षमं न युक्तम्। 'युक्ते क्षमं शक्ते हिते त्रिषु' इत्यमरः। हि यस्माद्विजयार्थिनो विजिगीषवः क्षितीशा अरिषु विषये सोपधि सकपटं यथा तथा। 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे' इत्यमरः। सन्धिदूषणानि विदधति केनचिद्व्याजेन दोषमापाद्य सन्धि दूषयन्ति। विघटयन्तीत्यर्थः। शक्तस्य हि विजिगीषोः सर्वथा कार्यसाधनं प्रधानमन्यत्समयरक्षणादिकमशक्तस्येति भावः। अर्थान्तर- न्यासोऽलङ्कारः। पुष्पिताग्रा वृत्तम् ।।

उक्तमर्थमाशीर्वादपूर्वकमुपसंहरति---

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ।। १.४६ ।।

**इति भारविकृतौ महाकाव्ये किरातार्जुनीये प्रथमः सर्गः।**

**अन्वयः-** विधिसमयनियोगात् अगाधे आपत् पयोधौ मग्नम् दीप्तिसंहारजिह्मं शिथिलवसुं रिपुतिमिरम् उदस्य उदीयमानं त्वां दिनादौ दिनकृतम् एव लक्ष्मीः भूयः समभ्येतु।

विधीति।। विधिर्दैवम्। 'विधिर्विधाने दैवे च' इत्यमरः। समयः कालस्तयोर्नियोगान्नियमनाद्धेतोः। तयोर्दुरतिक्रमत्वादिति भावः। अगाधे दुस्तरे। आपत्पयोधिरिवेत्युपमितसमासः। दिनकृतमिवेति वक्ष्यमाणानुसारात्तस्मिन्नापत्पयोधौ मग्नम्। सूर्योऽपि सायं सागरे मज्जति परेद्युरुन्मज्जतीत्यागमः। दीप्तिः प्रताप आतपश्च तस्याः संहारेण जिह्ममप्रसन्नम्। शिथिलवसुं शिथिलधनम्, अन्यत्र शिथिलरश्मिम्। 'वसुर्देवेऽग्नौ रश्मौ च वसु तोये धने मणौ' इति वैजयन्ती। 'शिथिलबलम्' इति पाठे तूभयत्रापि शिथिलशक्तिकमित्यर्थः। रिपुस्तिमिरमिवेति रिपुतिमिरमुदस्य नीरस्योदीयमानमुद्यन्तम्। 'ईङ् गतौ' इति धातोर्दैवादिकात् कर्तरि शानच्। त्वां दिनादौ दिनकृतमिव लक्ष्मीर्भूयः समभ्येतु भजतु। 'आशिषि लिङ्लोटो' इति लोट्। चमत्कारकारितया मङ्गलाचरणरूपतया च सर्गान्त्यश्लोकेषु लक्ष्मीशब्दप्रयोगः। यथाह भगवान्भाष्यकारः---'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवन्त्यध्येतारश्च प्रवक्तारो भवन्ति' इति। पूर्णोपमेयम्। मालिनी वृत्तम्। सर्गान्तत्वाद् वृत्तभेदः। यथाह दण्डी--'सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसंधिभिः। सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्।।' इति ।।

अथ कविः काव्यवर्णनीयाख्यानपूर्वकं सर्गपरिसमाप्तिं कथयति--इतीतयादि। इतिशब्दः परिसमाप्तौ। भारविकृताविति कविनामकथनम्। महाकाव्य इति महच्छब्देन लक्षणसम्पत्तिः सूचिता। किरातार्जुनीय इति काव्यवर्णनीययोः कथनम्। प्रथमः सर्गः। समाप्त इति शेषः। एवमुत्तरत्रापि द्रष्टव्यम्। किरातार्जुनावधिकृत्य कृतो ग्रन्थः किरातार्जुनीयम्। 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः' इति द्वन्द्वाच्छप्रत्ययः। राघवपाण्डवीयमितिवत्। तथा ह्यर्जुन एवात्र नायकः। किरातस्तु तदुत्कर्षाय प्रतिभटतया वर्णितः। यथाह दण्डी--'वंशवीर्यप्रतापादि वर्णयित्वा रिपोरपि। तज्जयान्नायकोत्कर्षकथनं च धिनोति नः।।' इति। अथायं संग्रहः---'नेता मध्यमपाण्डवो भगवतो नारायणस्यांशजस्तस्योत्कर्षकृते त्ववर्ण्यततरां दिव्यः किरातः पुनः। श्रृङ्गारादिरसोऽङ्गमत्र विजयी वीरः प्रधानो रसः शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम् ।।' इति।।

**इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां प्रथमः सर्गः समाप्तः।**

SAHITYA (Optional)

SASTRI/B.A II YEAR
Part II - Paper - IV

# KADAMBARI
## (Prathamasarga)

PART - C

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
(मानितविश्वविद्यालयः)


## Directorate of Distance Education
National Sanskrit University
(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)
Accredited at 'A' level by NAAC
Tirupati - 517 507 (A.P.)

# कादम्बरी

एवं समतिक्रामत्सु केषुचित् दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारानुपकरणसम्भार-सङ्ग्रहार्थमादिदेश। समुपस्थितयौवराज्याभिषेकञ्च तं कदाचिद्दर्श-नार्थमागतमारूढविनयमपि विनीततरमिच्छन् कर्त्तुं शुकनासः सविस्तरमुवाच।

'तात! चन्द्रापीड! विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलञ्च[5] निसर्गत एव अभानुभेद्यमरत्नालो कच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवन-प्रभावम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टमनञ्जनवर्त्तिसाध्यमपरम् ऐश्वर्य्यतिमि-रान्धत्वम्। अशिशिरोपचारहार्य्योऽतितीव्रः दर्पदाहज्वरोष्मा। सततममूलमन्त्रशम्यः विषमो विषयविषास्वादमोहः। नित्यमस्नानशौचबध्यः बलवान् रागमलावलेपः। अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवति, इत्यतः विस्तरेणाभिधीयते। गर्भेश्वरत्वमभिनव- यौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैक- मप्येषामायतनम्, किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयम् उपभोगमृगतृष्णिका नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विपयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्या-पतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्त्तकः पुरुषमत्यासङ्गो विषयेषु। भवादृशा एव भवन्ति भाजनानि उपदेशानाम्! अपगतमले हि मनसि स्फटिकमाणाविव रजनिकरगभस्तयो विशन्ति सुखेन उपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति। हरति च सकलम् अतिमलिनमप्यन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव। गुरूपदेशः प्रशमहेतुर्वयः परिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेम तदेव परिणमयति, अयमेव चानास्वादित-विषयरसस्य ते काल उपदेशस्य। कुसुमशर-शर -प्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम्। अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं वा विनयस्य। चन्दनप्रभवो न दहति किमनलः, किं वा प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानलो स्वारिणा। गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलस्नानम् अनुपजातपलितादिवैरूप्य- मजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरूकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणं अतीतज्योतिरालोकः नोद्वेगकरः प्रजागरः, विशेषेण राज्ञाम्, विरला हि तेषामुपदेष्टारः। प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात्। उद्दाम-दर्प-श्वयथुस्थगित- श्रवणविवराश्चोपदिश्यमानमपि ते न श्रृण्वन्ति। श्रृण्वन्तोऽपि च गजनिमीलितेनावधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्। अहङ्कार-दाहज्वर-मूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः, अलीकाभिमानोन्मादकारीणि

धनानि, राज्य-विष-विकार तन्द्रीप्रदा राजलक्ष्मीः ।

आलोकयतु तावत् कल्याणाभिनिवेशो लक्ष्मीमेव प्रथमम्। इयं हि सुभट-खङ्गमण्डलोत्पल-वन-विभ्रम -भ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेरतिनैष्ठुर्य्यम् इत्येतानि सहवास-परिचयवशाद्विरहविनोदचिह्नानि गृहीत्वेवोद्गता। नह्येवंविधमपरिचितमिह जगति किञ्चिदस्ति यथेयमनार्य्या। लब्धापि खलु दुःखेन परिपाल्यते। दृढगुणपाश-सन्दान-निष्पन्दीकृतापि नश्यति। उद्दाम-दर्प-भटसहस्रोल्ला-सितासिलता पञ्जर- विधृताप्यक्रामति। मदजल-दुर्द्दिनान्धकारगज-घन-घटा-परिपालितापि प्रपलायते, न परिचयं रक्षति, नाभिजनमीक्षते, न रूपमालोकयते न कुलक्रममनुवर्त्तते, न शीलं पश्यति, न वैदग्ध्यं गणयति, न श्रुतमाकर्णयति, न धर्म्ममनुरुध्यते, न त्यागमाद्रियते, न विशेषज्ञतां विचारयति, नाचारं पालयति, न सत्यमवबुध्यते न लक्षणं प्रमाणीकरोति। गान्धर्वनगरलेखेव पश्यत एव नश्यति। अद्याप्यारूढ-मन्दर-परिवर्त्तवर्त्त-भ्रान्ति-जनितसंस्कारेव परिभ्रमति । कमलिनी-सञ्चरणव्यतिकर -लग्न-नलिन-नाल-कण्टक-क्षतेव न क्वचिदपि निर्भरमाबध्नाति पदम्। अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विविध-गन्धगज-गण्डमधुपानमत्तेव परिस्खलति। पारुष्य-मिवोपशिक्षितुमसिधारासु निवसति। विश्वरूपत्वमिवग्रहीतुमाश्रित नारायणमूर्त्तिम्। अप्रत्ययबहुला च दिवसान्त-कमलमिव समुपचित-मूल-दण्ड-कोष-मण्डलमपि मुञ्चति भूभुजम्। लतेव विटपकानध्यारोहति। गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला दिवसकरगतिरिव प्रकटित-विविध-संक्रान्तिः। पातालगुहेव तमोबहुला। हिडिम्बेव भीमसाहसैकहार्य्यहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया स्वल्पसत्त्वमुन्मत्तीकरोति सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम्, गुणवन्तमपवित्रमिव न स्पृशति, उदारसत्त्वममङ्गलमिव न बहु मन्यते, सुजनमनिमित्तमिव न पश्यति, अभिजातमहिमिव लङ्घयति, शूरं कण्टकमिव परिहरति, दातारं दुःस्वप्नमिव न स्मरति, विनीतं पातकिनमिव नोपसर्पति मनस्विनमुन्मत्तमिवोपहसति। परस्परविरुद्धश्चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम्। तथाहि, सततम् ऊष्माणमारोपयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावतामाविष्करोति। तोयराशिसम्भवापि तृष्णां संवर्द्धयति। ईश्वरतां दधानापि अशिवप्रकृतित्वमाननोति। बलोपचयमाहरन्त्यपि लघिमानमापादयति। अमृतसहोदरापि कटु -विपाका। विग्रहवत्यपि अप्रत्यक्षदर्शना। पुरुषोत्तमरतापि खलजनप्रिया। रेणुमयीव स्वच्छमपि कलुषीकरोति। यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति। तथाहि, इयं संवर्द्धनवारिधारा तृष्णाविषवल्लीनाम्, व्याधगीतिरिन्द्रियमृगाणाम्, परामर्शधूमलेखा सच्चरितचित्राणाम्, विभ्रमशय्या मोहदीर्घ- निद्राणाम्, निवासजीर्णवलभी धनमदपिशाचिकानाम्, तिमिरोद्गतिः शास्त्रदृष्टीनाम्, पुरः पताका सर्वाविनयानाम्, उत्पत्तिनिम्न। क्रोधावेगग्राहाणाम्, आपानभूमिः विषयमधूनाम्, सङ्गीतशाला

भ्रूविकारनाट्यानाम्, आवासदरी दोषाशी विषाणाम्, उत्सारणवेत्रलता सत्पुरुषव्यवहाराणाम् अकालप्रावृट् गुणकलहंसकानाम्, विसर्पणभूमिर्लोकापवादविस्फोटकानाम् प्रस्तावना कपटनाटकस्य, कदलिका कामकरिणः, बध्यशाला साधुभावस्य, राहुजिह्वा धर्म्मेन्दुमण्डलस्य। न हि तं पश्यामि, यो ह्यपरिचितयानया न निर्भरमुपगूढः, यो वा न विप्रलब्धः। नियतमियमालेख्यगतापि चलति, पुस्तमय्यपि इन्द्रजालमाचरति, उत्कीर्णापि विप्रलभते, श्रुताप्यभिसन्धत्ते, चिन्तितापि वञ्चयति।

एवंविधयापि चानया दुराचारया कथमपि दैववंशेन परिगृहीताः विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानताञ्च गच्छन्ति। तथाहि, अभिषेकसमय एव चैषां मङ्गलकल-सजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्य्यधूमेनेव मलिनीक्रियते हृदयम्, पुरोहित कुशाग्र-सम्मार्जनीभिरिवापनीयते क्षान्तिः, उष्णीषपट्ट -बन्धेनेवावच्छाद्यते जरागमनस्मरणम्, आतपत्रमण्डलेनेवापवार्य्यते परलोकदर्शनम्, चामरपवनैरिवापह्रियते सत्यवादिता, वेत्रदण्डैरि- वोत्सार्य्यन्ते गुणाः, जयशब्दकलकलैरिव तिरस्क्रियन्ते साधुवादाः ध्वजपटपल्लवैरिव परामृश्यते यशः। तथा हि केचित् श्रम-वश-शिथिल-शकुनि-गल-पुट-चपलाभिः खद्योतोन्मेषमुहूर्त्त-मनोहराभिर्मनस्विजनगहिताभिः सम्पद्भिः प्रलोभ्यमानाः, धन-लवलाभावलेपविस्मृतजन्मा-नोऽनेकदोषोपचितेन दुष्टासृजेव रागावेशेन बाध्यमानाः, विविधविषय-ग्रास-लालसैः पञ्चभि- रप्यनेक-सहस्रसंख्यैरिवेन्द्रियैरायास्यमानाः, प्रकृतिचञ्चलताया लब्धप्रसरेण एकेनापि सहस्रता- मिवोपगतेन मनसा आकुलीक्रियमाणा विह्वलतामुपयान्ति। ग्रहैरिव गृह्यन्ते, भूतैरिवाभिभूयन्ते, मन्त्रैरिवावेश्यन्ते, सत्त्वैरिवावष्टभ्यन्ते, वायुनेव विडम्ब्यन्ते, पिशाचैरिव ग्रस्यन्ते, मदनशरै- र्मर्म्माहता इव मुखभङ्गसहस्राणि कुर्वते, धनोष्मणा पच्यमाना इव विचेष्टन्ते, गाढप्रहाराहता इव अङ्गानि न धायन्ति, कुलीरा इव तिर्य्यक् परिभ्रमन्ति, अधर्म्मभग्नगतयः पङ्गव इव परेण सञ्चार्य्यन्ते, मृषावाद-विष-विपाक-सञ्जात-मुखरोगा इवातिकृच्छ्रेण जल्पन्ति, सप्तच्छद-तरव इव कुसुम-रजोविकारैरासन्नवर्त्तिनां शिरःशूलमुत्पादयन्ति, आसन्नमृत्यव इव बन्धुजनम् अपि नाभिजानन्ति, उत्कुपित-लोचना इव तेजस्विनो नेक्षन्ते, कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते, जातुषाभरणानीव सोष्माणं न सहन्ते, दुष्टवारणा इव महामानस्तम्भनिश्चलीकृताः न गृह्णन्त्युपदेशम्, तृष्णाविषमूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति, इषव इव पानवर्द्धिततैक्ष्ण्याः परप्रेरिता विनाशयन्ति, दूरस्थितान्यपि फलानीव दण्डविक्षेपैर्महाकुलानां शातयन्ति, अकालकुसुमप्रसवा इव मनोहराकृतयोऽपि लोकविनाशहेतवः, श्मशानाग्नय इवातिरौद्रभूमयः, तैमरिका इवादूरदर्शिनः, उपसृष्टा इव क्षुद्राधिष्ठितभवनाः, श्रूयमाणा अपि प्रेतपटहा इवोद्वेजयन्ति, चिन्त्यमाना अपि महापातकाध्यवसाया इवोपद्रवमुपजनयन्ति, अनुदिवसमापूर्य्यमाणाः पापेनेवाध्मातमूर्त्तयो भवन्ति, तदवस्थाश्च व्यसनशतशरव्यतामुपगताः वल्मीकतृणाग्रवस्थिताः जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति।

अपरे तु स्वार्थनिष्पादपरैर्धन-पिशित-ग्रास-गृध्रैरास्थाननलिनीबकैः द्यूतं विनोद इति, परदाराभिगमनं वैदग्ध्यमिति, मृगया श्रम इति, पानं विलास इति, प्रमत्तता शौर्य्यमिति, स्वदारपरित्यागः अव्यसनितेति, गुरुवचनावधीरणमपरप्रणेयत्वमिति, अजितभृत्यतासुखोप-सेव्यत्वमिति नृत्य-गीत-वाद्य-वेश्याभिसक्तिः रसिकतेति महापराधानाकर्णनं महानुभावतेति, परिभवसहत्वं क्षमेति, स्वच्छन्दता प्रभुत्वमिति, देवावमाननं महासत्त्वतेति, वन्दिजनख्यातिः यश इति, तरलता उत्साह इति, अविशेषज्ञता अपक्षपातित्वमिति, दोषानपि गुणपक्षमध्यारोप- यद्भिरन्तः स्वयमपि विहसद्भिः प्रतारणकुशलैर्धूर्त्तैरमानुषोचिताभिः स्तुतिभिः प्रतार्य्यमाणा वित्तमदमत्तचित्ता निश्चेतनतया तथैवेत्यन्यारोपितालीकाभिमाना मर्त्यधर्म्माणोऽपि दिव्यांशाव- तीर्णमिव सदैवतमिवातिमानुषम् आत्मानमुत्प्रेक्षमाणाः प्रारब्धदिव्योचितचेष्टानुभावाः सर्वजन- स्योपहास्यतामुपयान्ति। आत्मविडम्बनाञ्चानुजीविना जनेन क्रियमाणामभिनन्दन्ति। मनसा देवताध्यारोपणप्रतारणा सम्भूत -सम्भावनोपहताश्चान्तःप्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते। दर्शनप्रदानमपि अनुग्रहं गणयन्ति, दृष्टिपातमप्युपकारपक्षे स्थापयन्ति, सम्भाषणमपि संविभागमध्ये कुर्वन्ति, आज्ञामपि वरप्रदानं मन्यन्ते, स्पर्शमपि पावनमाकलयन्ति। मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः न पूजयन्ति द्विजातीन् न मानयन्ति मान्यान्, नार्च्चयन्त्यर्च्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्। अनर्थकायासान्तरितविषयोपभोग -सुखमित्युपहसन्ति विद्वज्जनम्। जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम् आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय, कुप्यन्ति हितवादिने। सर्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति, तं संवर्द्धयन्ति, तेन सह सुखमवतिष्ठन्ते, तस्मै ददति, तं मित्रतामुपनयन्ति तस्य वचनं श्रृण्वन्ति, तत्र वर्षन्ति, तं बहु मन्यन्ते, तमाप्रतामापादयन्ति योऽहर्निशमनवरतमुपरचिताञ्जलि- रधिदैवतमिव विगतान्यकर्त्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति। किं वा तेषां साम्प्रतम् येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम्, अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः, पराभिसन्धानपरा मन्त्रिण उपदेष्टारः, नरपतिसहस्रभुक्तोज्झितायां लक्ष्म्यामासक्तिः, मारणात्मकेषु शास्त्रेषु अभियोगः, सहजप्रेमार्दहृदयानुक्ता भ्रातर उच्छेद्याः।

तदेवंप्रायातिकुटिल-कष्ट-चेष्टा-सहस्रदारुणे राज्यतन्त्रे, अस्मिन् महामोहान्धकारिणि च यौवने, कुमार! तथा प्रयतेथाः यथा नोपहस्यसे जनैः न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सहृद्भिः न शोच्यसे विद्वद्भिः। यथा च न प्रकाश्यसे विटैः, न प्रहस्यसे कुशलैः नास्वाद्यसे भुजङ्गैः नावलुप्यसे सेवकवृकैः, न वञ्च्यसे धूर्तैः, न प्रलोभ्यसे वनिताभिः न विडम्ब्यसे लक्ष्म्या, न नृर्त्यसे मदेन, नोन्मत्तीक्रियसे मदनेन, नाक्षिप्यसे विषयैः, नावकृष्यसे रागेण नापह्रियसे सुखेन। कामं भवान् प्रकृत्यैव धीरः, पित्रा च महता प्रयत्नेन समारोपितसंस्कारः, तरलहृदयमप्रतिबुद्धञ्च मदयन्ति धनानि, तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान्। इदमेव च पुनः

पुनरभिधीयसे-विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति। सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान् नवयौवराज्याभिषेकमङ्गलम् कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम्, अवनमय द्विषतां शिरांसि, उन्नमय बन्धुवर्गम् अभिषेकानन्तरञ्च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्। अयञ्च ते कालः प्रतापमारोपयितुम्, आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति' इत्येतावदभिधायोपशशाम।

उपशान्तवचसि शुकनासे चन्द्रपीडस्ताभिरमलाभिः उपदेशवाग्भिः प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत इव निर्मृष्ट इव, अभिषिक्त इव, अभिलिप्त इव, अलङ्कृत इव, पवित्रीकृत इव, उद्भासित इव, प्रीतहृदयो मुहूर्त्तं स्थित्वा स्वभवनमाजगाम।